काव्यकौस्तुभः

३३७

४८ पत्राणी

नं. ३२६५
काव्यकौस्तुभ
४८ पत्राणि
अलङ्कारशास्त्र
अपूर्ण
लिपि [illegible]
लिपिसं. १८३१

कावकौस्तव

[illegible]

..66 [illegible]

काव्यकौ॰
१

॥श्रीगणेशाय नमः॥ कलानिधिर्निश्चितः श्रीमान् राधया समलंकृतः॥ दीप्तकुवलयः सोऽयं विधुवि
जयतेतरां॥ साहित्यस्यास्य शास्त्रस्य काव्यं गत्वा काव्यफलं सर्वविलावदाह॥ कीर्त्तिः सार्वज्ञ्य
मानंदो धनादीनि च काव्यतः॥ सार्वज्ञ्यं देवमानवादिप्राणिचेष्टावगतिरूपं॥ आनंदो रसानुभ
वसमुद्भूतः॥ धनं नृपतिप्रसादलब्धहस्त्यश्वादि संपत् आदिना धर्मकाममोक्षाः॥ तत्र धर्मो
जगबंधनादि॥ कामो धनकारकः मोक्षो ज्ञानकांडेऽस्युत्पत्तिविधानादिरूपेण तत्सर्वं काव्यादेव भवे
दतस्तत्र प्रवृत्तिः सफलेत्याशयं॥ तस्य हेतुमाह॥ हेतुस्तस्य नवेत्युक्तिः शिक्षानिपुणता तथा॥ शक्ति
:पूर्वसंस्कारः शिक्षा काव्यविदुपदेशः॥ निपुणता तु व्याकरणाभिधानकोशछंदः प्राचीनकाव्या काव्यस्य ५
अभ्यासात् ५ दीनि आलोचनाद्युत्पत्तिः तस्य काव्यस्योद्भवे कारणं॥ तस्य लक्षणमाह॥ कविना निर्मितं वाक्य
काव्यं चमत्कार गद्यपद्यात्मना रचितं कवेर्वाक्यं काव्यं॥ उदाहरणं॥ कोकिलकलकूजितकंपा
श्च॥ तनुजितशंपां प्रियां पश्यन्नु॥ वपुरवनमितपयोदः समुदितमोदः स माधवो जयति॥ गद्यप
घयाश्चमत्कारकत्वं चातुर्यादेव भवति॥ चातुर्यं तु युक्तिविशेषेणार्थनियोजनं॥ तस्मादिव
र्णयंति॥ शास्त्रोर्गादितवीर्यादिनिर्जयान्नायकस्तुतिः॥ चातुर्यमिति पश्चात्तनं संवर्धते

१२.

उदा॰ ॥ तत्र प्राप्तधनुर्विद्यं सर्वज्ञं क्षात्रकंटकं ॥ गर्विष्ठं खर्वयामास भार्गवं राघवाग्रणी ॥ दृष्टांते
नाल्पवर्णेन महतोऽर्थस्य कीर्तनं ॥ उदा॰ ॥ भगवत्संगतिं याति यो जलस्यापहारकः ॥ अत्र भ
गवद्विस्मेनेन भगवत्स्यापि कासक्ति ॥ मध्येन लघुना वास्या ऊर्जोराघ्वप्रकाशनं ॥ निजनक्र ॥यथा॥२
मुखावर्त्य यः कालमप्यतिवर्त्तते ॥ पुरुषाय नमस्तस्मै कचित्सुरतेजसे ॥ रावणेन निपीडितैः
स्वरैरभ्यर्थितो भगवक्षापरे एव तद्विनाशकार्यीत्वं चेतां प्रकल्प्यतं विजघान ॥ आदित्यातोधित
श्वतन्सुतारवाय बलिवृद्धिकाल मन्मथयतनू बलिं ऊसयामासेति यथा दृष्टा प्रकाशने ॥ अपा
रानंदविज्ञप्रियास्यान्मुनपहादृदिभिः ॥ यथा ॥ सास्मि नाम गण्डवाही गाढमालिंगितामया ॥
मामामेतियदन्नतन्मे कृंतति मानसं ॥ अत्रमेत्यनंतरं पीडयेति भूनसत्तस्याः मुखमिंधुम
गनतो बोधयति ॥ इतोगति प्रसिद्धस्य न कुर्यादाहरकचित् ॥ यथा ॥ नयुदेन क्रेवाः स्यंदे नेवबी
रानिवारिता ॥ विरख्यातिं संहितो क्रिया तस्माद्दृश्याय कल्प्यते ॥ यथा ॥ युवामवहि विरखातो
तं जलैर्जलधिर्जलैः ॥ अचातुर्यं साहित्येनोक्तिर्यत्नस्तत्तुल्यतायै स्यात् ॥ ख्यातदासनिरा
सख्यवीक्ष्यते गुणवर्णनात् सुधानिहृति संसारं केसारियमाख्य दृश्यते ॥ चातुर्यं कवितायां

॥यथा॥

काव्यको. स्यादेवमाद्यर्थयाजनं स्फुटं ॥ इदं काव्यलक्षणं कविवचनमात्रेण नातिव्याप्तं ॥ निर्मितमिति
सूक्तेः वाक्यं रसात्मकं रसात्मकं काव्यमिति तु रामसहसीतया क्रीडतीत्यत्रातिव्याप्तं
२ रसात्मकवाक्यत्वात् ॥ अदोषौ सगुणौ सालंकारौ शब्दार्थौ काव्यमिति कुरंगनयने त्यत्रातिव्या
प्तं ॥ तादृशशब्दार्थरूपत्वात् ॥ अथास्य शरीरादिस्वरूपमाह ॥ शब्दार्थविग्रहं ॥ यत्काव्यमि शारीरं ४
ति निसंबध्यते ॥ शब्दार्थशरीरं काव्यमिति ॥ तस्यात्मा तु रसो व्यंग्यस्तदन्यः प्राणउच्यते ॥ रस
भावादिर्व्यंग्यः काव्यस्यात्मा वस्त्वादिस्तु प्राण ॥ रसभावा तदाभासभावशान्त्यादि कारणः
सर्वोपि रस्यमानत्वाद्रसशब्देन कीर्त्तितः ॥ स्फुटं ॥ उत्कर्षकरणो निःस्युर्गणालंकारीत
यः ॥ ओजप्रभृतयो गुणाः शौर्यादिवत्काव्यस्योत्कर्षकाः ॥ अनुप्रासोपमादयोलंकारा
कुंडलकंकणादिवत् ॥ वेदर्भीप्रमुखा रीतयस्त्वंगसंस्थानविशेषवत् ॥ दोषाः श्रुतिकटुत्वा
ध्यानवपुरपकर्षकाः ॥ काणत्वादिवत् श्रुतिकटुत्वादयः काव्यमपकर्षयंत स्तस्य दोषाः
स्युः गणादिषु येयद्धर्मा यथा वदुत्कर्षयित्वापकर्षयंत च तत्र्चूर्द्ध वक्ष्यामः ॥ इति काव्य
कौस्तुभ काव्यफलादिनिर्णयः ॥ प्रथमो प्रभा ॥ अथ काव्यविग्रहात्मतयोः शब्दार्थयोः

शारीरन्नूतयो १

क्रमात्स्वरूपमाह ॥ मुख्यो लाक्षणिकः शब्दो व्यंजकश्चेति स त्रिधा ॥ मुख्यो वाचकः ॥ अर्थस्त्वि
वोक्रमाद्वाच्यलक्ष्यव्यंग्याः प्रकीर्त्तिताः ॥ वाच्यादीनां स्वरूपमाह ॥ वाच्योभिधयावे
द्यो लक्ष्यो लक्षणया भवेत् ॥ व्यंग्यो व्यंजनया तस्मात्तिस्रः शब्दस्य वृत्तयः ॥ एक एव शब्दस्ति शक्तयः ३
स्त्रिर्वृत्तिनिमित्तस्त्रिविधः स त्रिविधानर्थान्बोधयति ॥ यथा गंगाशब्दोभिधया प्रवाहं
पावनं ५ लक्षणया तीरं । व्यंजनया तु शैत्यादीनि ॥ शक्तिरत्राभिधा ॥ वृत्तिर्व्यापारः ॥ क्रियाचेति पर्या नामांतरव्याख्या
यशब्दाः ॥ अर्थअभिधायां वाचकस्य लक्षणमाह ॥ यया स्वाभाविको वृत्त्या शब्दस्यार्थोवि रित्पर्यायः ॥ ५
शब्दः ६ गम्यते साभिधा योगतस्तस्या वाचकोसौ प्रकीर्त्तितः ॥ उच्चारितमात्राच्छब्दात्साहजिको
प्रसिद्धः ५ अर्थः प्रतीतः तत्र शब्दस्य या वृत्तिः साभिधा तदाश्रयशब्दो वाचकः ॥ यथा गंगेयमित्युक्ते गं
ख्याति ८ गाशब्दात्साहजिकतया वेगवत्प्रवाहविशेषः तस्य वृत्तिरभिधा तया युक्तो सो तस्य वाचकः
॥ अभिधा बोधयेदर्थं संकेतसहचारिणी ॥ अस्माच्छब्दादयमर्थो बोधव्य इतीश्वरेच्छा
संकेतः ॥ संकेतो गृह्यते यस्माज्जात्यादिषु चतुर्ष्विति ॥ चतुर्धा वाचकः केचिज्जातावेव
तिमन्वते ॥ जातिगुणक्रियासंज्ञारूपेषु चतुर्ष्वर्थेषु ... श्यामः पाचको डित्थ इत्या

काव्यको॰ इत्यश्चतुर्विधाः शब्दाः क्रमात्संकेतवंतः ॥ जात्यादयश्च संकेतिताः कथ्यंते ॥ तत्र जातिर्ब्राह्मण
पिंडादिषु ब्राह्मणत्वाद्या व्यवहारनिर्वाहिका ॥ गुणः सजातीयव्यावृत्तिधीहेतुः श्यामादिः
३ श्यामादयो हि जंतून्सजातीयेभ्यो गौरादिजंतुभ्यो व्यावर्त्तयंति ॥ क्रियाश्चर्वापरिणतांगया पृथक्कुर्वंति २
काद्याः ॥ संज्ञा नु वक्तृस्वेच्छाकल्पितशब्दरूपा स्वयं वाच्यवाचकभावभाक् ॥ एषु व्यक्तिधर्मेषु शरीरधर्मेषु ४
ब्राह्मणादीनां ५ व तेषां शब्दानां संकेतः ॥ नैव्यक्तीनामाक्षेपादर्थक्रियारितासिद्धा ॥ व्यक्तिषु तु संकेतो नानंत्याद्व्य संकेतवद्भिर्ब्राह्मणादिशब्दैः ॥ २
भिचाराच्च ॥ आनंत्याद्धि व्यक्तयस्तासु संकेतो ग्रहीतुमशक्यः ॥ असंकेतितब्राह्मणव्यक्तेरिव शू
द्रादिव्यक्तेरपि ब्राह्मणशब्दात्प्रतीतिः स्यादगृहीतसंकेतितायास्तोत्व्यादिनि व्यभिचाराच्च
व्यक्तिषु सो संकेत: ताँस्वसौ न ग्राह्यः ॥ न च गवादिगतानां श्यामादिगुणेन गुडादिगतानां पाकादिक्रियाणां बालादि
गतानां डित्थादिसंज्ञानां च प्रत्ययसंततो भेदसिद्धौ व्यक्तिसंकेतपक्षोक्तदोषसम इति वाच्यं ॥ गु
णादीनां मुख्यत्वात् ॥ तेषां भेदस्फूर्त्तिस्त्वाश्रयभेदादेव न तु स्वतः दुग्धगुडादिभेदान्मुखभेदव
त ॥ प्रत्यभिज्ञया धर्मिभेदग्रहस्य बाधा ह्याश्रयभेदहेतुकात्तद्भेदधीरिति ॥ अथवा जातिवाच्य
व सर्वोपि शब्दः ॥ तथाहि ॥ मुदिरमरकतकोकिलादिष्वयं श्यामोयं श्याम इत्यादिप्रत्ययाविशे

तत्तादृशं तावद्गाह्यज्ञाने प्रसिद्धा २

४६ वयवशक्तिसमुदायश

पा-च्छामत्वादिः॥ गुडतंदुलपाकादिषु यंथ्या कोयं पाक इति पाकादित्वं॥ वालन तरुणकारा चारितेषु
डित्थादिशब्देष्वयं डित्थोयं डित्थ इति डित्थादित्वमिति सर्वत्र जातेरनुगतत्वात्॥ स च को योगिकरूढो

योगिकः ३ योगरूढश्च कीर्त्तितः॥ तत्रौद्यः पाचकादिरवयवशक्त्या यायं वोधयति॥ मधुमोमंडपादिः समु रूढः २

योगिरूढस्तु ४ दायशक्त्यार्थं स्वस्तु पंकजादिरुभयशक्त्येति॥ अथ लक्षणया लाक्षणिकस्य च लक्षणमाह॥

मुख्यार्थेवाधे ५ शक्यार्थवोधे लघुकेयया यान्यप्रतीयते॥ सा लक्षणा तया बोध्यो लाक्षणिकः स्मृतः॥ अज

अजहत्जहत्स्वार्था ६ हत्स्वार्थाऽजहत्स्वार्था तथास्यादुभयात्मिका॥ द्विधा रूढिफलाभ्यां सा॥ कलिंगः साहसी साहो
कलिंगादिशब्दो देशविशेषादिरूपे स्वार्थेऽसंभवन् रूढिमाश्रित्य यया स्वसंयोगसंबंधवंतं पुरु
षादिमन्यार्थं वोधयति सा रूढिलक्षणा गंगायां घोषः प्रवसीत्यादौ गंगाशब्दो जलमयादिरूपस्वा
र्थेऽसंभवन् प्रयोजनमुद्दिश्य यया स्वसामीप्यादिसंबंधवंतं तटादिमन्यार्थं वोधयति सा फल
लक्षणा॥ गंगातटे घोष इति प्रतिपादनाऽसंभाव्यशैत्यपावनत्वातिशयस्य वोधनमिह फलं॥ जहत्स्वार्थ
यं॥ देशादिप्रवादादिश्च स्वार्थस्य त्यागात्॥ जहत्स्वार्थेयमिति॥ द्वितीयान्यपदार्थोपि कुंप्रविंहिः॥
कुंतागच्छंतीत्यादेः जहत्स्वार्थानां कुंतानां त्यागाभावात्॥ एवं छत्रिणः प्रयांतीति छत्रिपदस्य का

५ घोषस्याभारवद्धीस्यात्॥

काम को.

५

देलक्षणा ॥ तत्त्वेन इत्थिणस्तदृत्यक्षाव्याववोधनात् ॥ काकेभ्यो दधि रक्ष्यतामित्यत्र काकपदं स्वस्य दधु
पघातकमुपलक्षणा ॥ तेन तेषां बाधनात् ॥ एषु कुंतादीनामतिगहनत्वादीनि फलानि ॥ प्रायं देव
दत्त इत्यादौ जहदजहल्लक्षणार्था ॥ तत्काललतत्कालयोस्त्यागाच्च ॥ एवं दृशो गच्छतीत्यत्रेति ॥ गौणी
स्यात् गुणयोगतः ॥ लक्ष्यमाणगुणे योगात् गौणी लक्षणोच्यते ॥ यथा सिंहो देवदत्तः इति गौर्वाही
क इति च अत्र सिंहादिशब्दो मुख्यदृत्या देवदत्तादिशब्देन सहान्वयमप्राप्नुवन् शौर्यजाड्यादिस
मानगुणसंबंधेन देवदत्तादिमर्थं यथा लक्षयति सा गौणी दृत्ति ॥ नेदं सत्यपि लाक्षणावगति
फलं ॥ कार्यकारणभावादिसंबंधाद्वा गुणा च सा ॥ क्वचिदन्यथानुपपत्ति क्वचित्तात्पर्यानुपप
त्तिश्च लक्षणाया बीजं बोध्यं ॥ गंगायां घोष इत्यत्र प्रवाहे घोषान्वयानुपपत्त्या तीरे लक्षणा ॥ कुंताः
प्रविशंतीत्यत्र प्रवेशान्वये संभवत्यपि भोजने तात्पर्यानुपपत्त्या कुंतधरे मुलक्षणेति ॥
अगूढागूढरूपत्वाद्व्यंग्यस्यैव पुनर्द्विधा ॥ इयं फललक्षणा ऽगूढव्यंग्या गूढव्यंग्या चेति द्विधा ॥
यथा ॥ उत्कीर्णानि विचित्राणि नवोद्भिन्नानि मुक्तवः ॥ पिबंति दृग्भिरंगानि नंदसूनोर्दनिशं
॥ अत्रोत्कीर्णपदे सत्तत्वासाद्दश्यानि लक्षणानि निर्माणसौष्ठवादीनि व्यंग्यानि ॥ तानि च गूढा
नालक्षणा यथा मुक्तिः सत्सेवा आयुर्घृतमित्यादि अत्राप्येवलक्षणे न कार्यकारित्वं फलं यथा च हरिनको हरिर्नृपः तत्रोनपद्मस्त्रस्व

५

न्येव सकृदयमात्रवेद्यत्वात् ॥ इत्यभिः यानस्यासंनवान्नादृशवलोकोलक्ष्यः ॥ गाढासक्तिर्व्यंग्यासा
गूढा ॥ वाच्यवत्सर्ववेद्यत्वात् ॥ इत्थं निरूपितया लक्षणया गाढ्या ग्रीलिकशब्दा ॥ अथ व्यंजना
व्यंजकयोर्लक्षणमाह ॥ विरतास्वभिधाद्यासु यंपरोऽर्थो बोध्यते यया ॥ व्यंजना सा तया योगाच्छब्दा
दिर्व्यंजको मतः ॥ शब्दबुद्धिकर्मणां विरम्य व्यापाराभावादभिधादिषु स्वं स्वमर्थं निवेद्य विरतासु
यया परोऽर्थो बोध्यते सा शब्दस्यार्थस्य वृत्तिर्व्यंजना ॥ तया योगाच्छब्दार्थश्च व्यंजकः ॥ शब्दार्थौ चेति ब्या

शाब्दी व्यंजनाद्
सा द्विधा तयोः शब्दी पुनर्द्विधा ॥ एकस्याभिधामूला लक्षणामूलिका परा ॥ तयोराद्यामाह ॥ श अभिधामूला शाब्दी व्यंजनाद्
ब्दस्यानेकार्थकस्याभिधायां संयोगाद्यैकतो नियंत्रितायां तस्यार्थबोधयज्ञापयति तन्मूला सो व्यं अभिधामूला शाब्दी व्यंजना७
जना विज्ञिरुक्ता ॥ अनेकवाच्यस्य शब्दस्याभिधायां संयोगादिभिरेकस्मिन्नर्थे नियमितायां स
त्यां तस्या वृत्तिर्वाच्येतरार्थबोधये साभिधामूला शाब्दी व्यंजना ॥ व सशंखचक्रो हरिरच्युत जानातीति
चक्रसंयोगविज्ञानाद्यां हरिशब्दस्याभिधा भवति नियमिता ॥ भीमार्जुनावित्यर्जुनः पार्थः सा
हचर्यात् कर्णार्जुनाविति कर्णो राधेयो विरोधात् ॥ सर्वं जानाति देवइत्र देवो भवान् सकर
णात् ॥ चंद्रो व्योम्नि विभातीति चंद्रः शशी देशविशेषात् ॥ मधुना कोकिलो मत्त इति मधुर्वसं

६ अत्र केचित् श्लेषस्यायं विषयः परिहृत्य सहविध्यादिशाद्येणादान्ततु व्यंजनस्यैवाकृतंन ॥ ६

तः सद्विधानसामर्थ्यात् ॥ समनामधुनावधूरितिनु मध्वामवस्तद्विधानयोग्यत्वात् ॥ एवं संयोग
वियोगसाहचर्यविरोधप्रकरणदेशसामर्थ्ययोग्यतानिरकस्मिन्नर्थेऽभिधाया नियमनं स्या
त् ॥ यथा ॥ घनः सन्नंकोपि निरीक्षतेमया हरिश्चलापांगि चिरीक्षि कौस्तुभं नकं स्तुनस्थैर्यं कुंच
कुंभकान् करोति मुक्ता धवलो वनस्थली ॥ अत्र कौस्तुभसंयोगेन हरिशब्दः कृष्णमेवाभिध
त्ते सिंहस्तु व्यंजनयागम्य ॥ तयोरुपमाच ॥ यथावा ॥ कलानिर्निमनदिति ॥ अत्र विधुशब्दः
प्रकरणेन भगवंतमभिधत्ते ॥ चंद्रस्तु व्यंजनयालभ्य ॥ ननु श्लेषस्यायं विषयः ॥ परिहृत्य स
विधादिपदप्रहादितिचेन्न हृस्यानवबोधानात् ॥ तथाहि ॥ नानार्थस्य श्लेषस्यानेकत्रतात्पर इदमत्र रहस्यं
ऽथवानौवतरति र्यग्राहकं प्रकरणादियुगपद्वतरति न वा श्लेषः ॥ यथा ॥ सर्वज्ञचंदनधवलकुचाप्रियासावनीसा
घनच्छायाऽत्र नायकाटवी प्रतिपाद्यते ॥ न च प्रकरणं युगपदवतरत्यावतरेद्वा ॥ यत्रैक एव
रवतरति तत्र व्यंजनेव यथा कलानिधिरित्यादौ ॥ अथ परामादु ॥ लक्षणासीकृतायसमेतच्छेत्यादि
कलं यथा ॥ बोध्यते साधुधैरुक्तो व्यंजनालक्षणाश्रया ॥ गंगायांघोषप्रतिवसतीत्यादिषुप्रवाहा
दिप्रतीतिपादनादभिधायांतटादि प्रतिपादनात्तेच लक्षणायामुपलक्षणायां ययाशैसाधयति

शब्दादिर्बोध्यमंते सा लक्षणामूला व्यंजना ॥ फलेनानिध्यायसंकेतिताभावात् ॥ न च लक्षणेव तल्लाभो बा
त ॥ मुख्यार्थबाधो मुख्यार्थसंबंधः फलं रूढ्यन्यतरच्चेति त्रयं तस्या हेतुः ॥ किंतु व्यंजनैव तस्य प्र
त्यायिका इति स्वीकार्यैव सा ॥ अथार्थव्यंजनामाह ॥ वक्तृबोद्धव्यवाच्यादिवैशिष्ट्यान्नार्थतो यया ॥ अर्था
तरं प्रतीयते सार्थव्यंजना स्मृता ॥ अर्थतो वाच्यलक्ष्यव्यंग्यरूपात् ॥ तत्र वाच्यस्य व्यंजकत्वं यथा ॥
विलुलितचिकुरा विलुप्तचित्रा लम्ममसि वरश्रमसूचकांगकांतिः ॥ अथ सपदि कृतार्त्ति चारुवेशा नि
वसमराग्नि वधूर्वयो मुपेति ॥ अत्र स्मराकांतेन कांतेन नशोपभुक्तां त्वां वीक्ष्य वधूः परिहसिष्यं
स तःस्नानादिनिस्त्रविक्लान्यपनेयेति सैवाव्यार्थो व्यंजयति ॥ लक्ष्यस्य यथा ॥ व्रजपतिमतिसुंदरां
गमंगीकृतमाह हले नहि लक्ष्यलमलक्षणो ॥ यदि तव नवनेसुखानिलाभः सुमुखि चकास्ति चयेन
बांधवानां ॥ अत्र बंधुभिः सह गदसुखस्पृहां विहाय व्रजराजसुतं पश्यतिजद्दत्स्वार्थया लक्ष्यार्थस्त्वद्दी
साहिनेव तदेता कृत्यमफलमिति व्यनक्ति ॥ उनयत्र वक्तृबोद्धव्यवैशिष्ट्यं ॥ व्यंग्यस्य यथा ॥ अरविं
दवनीं चरन्मरंद्धान्नमदद्विरदेंद्रवंदितां स्मिन ॥ विलसत्सं चलं पतत्रिराजीवदृय्या व्लायता सिवप
श्य ॥ अत्रेनिर्जनाप्रदेशादिति व्यंग्यार्थः सुरतोऽहं लंतस्य व्यनक्ति वाच्यस्य व्यंग्यस्य वैशिष्ट्यात् ॥ अ

वनिताभिहस्तात प्यास्वभरः ५

नंदुराजा

ई तत्र मांसं यो जयेति काव्यो यो द्योतयति देशावेशिष्ठ्यात् यत्र शब्दस्य प्राधान्येन व्यंजकत्वं तत्रार्थस्य गौणं तत।। यत्रत्वर्थस्य
प्राधान्येन व्यंज
कत्वं ५

काव्यको· ~~रविंदमकरंदसंनतः।। सखि यस्मिन् रमते~~ रेधुनां मुदिरागमे मनोज्ञाः सखि विरत्नधुनिदीपिता वडम्य।।
६ निपतत्स्वरितगर्जितांबुधारा मुखरी भूतगृहांतरां नयंति।। अत्र केकांतमानेष्वामी त्रिसंकेतमिशिते
नश्छन्नी दूती प्रतिनिनदानी कुंजोरस्य किंतु भुवनमेवेति वाच्यार्थो ऽभिंजयति काल्वैशिष्ट्यात्।। अ
रविंदमकरंदसंनतः सखि यस्मिन् रमते समीरणः।। नवपल्लवमंदिरं जनः प्रति१ द्योतपदैर्मुनेनत
तः।। अत्र कांतेन क्रूष्टेन सा ~~तत्रार्थस्य गौणत्वं तत।। यत्रत्वर्थस्य प्राधान्येन व्यं~~जकत्वं तत्र शब्दस्य तत्र गौ
णमिति प्राधान्येन व्यपदेशा शब्दार्थयोर्व्यंजकत्वे युक्तिः।। इति कौस्तुभे शब्दार्थवृत्तिनिर्णयो द्वितीयस्त
रंगः।। एवं काव्यशरीरभूतौ शब्दार्थौ निरूप्य इदानीं तदात्मभूतान् रसादीन् निरूपयति।। तत्र रसस्वरू
पमाह।। विभावैरनुभावैश्च सात्विकैर्व्यभिचारिभिः।। व्यक्तोऽरसादिकः स्थायी विद्वद्भिः कथितो रसः।।
एतद्व्याचष्टे।। रत्यादेः स्थायिनस्तस्यालंबनोद्दीपनाह्वये निमित्तकारणे प्राज्ञैर्विभावः परिकीर्तितः।।
स्थायिनस्तस्यालंबनोद्दीपनो मतः।। तेषामुद्दीपकः प्रोक्तो बुधैरुद्दीपनाभिधः।। ललनादिर्यथा
स्याततोयथा चंद्रिका चंदनादिकं।। अनुभावस्तु रत्यादेः रूपजातिः स्मितादिकं।। सात्विकास्तंभरोमांचवै
वर्ण्यस्वेदसंलयाः।। स्वरभंगाश्रुकंपाश्च रसजैरष्टकीर्तिताः।। स्थायिनः पोषका निर्वेदादिः संचारि
६

संज्ञकः॥ निर्वेदग्लानिदैन्यानि शंकासूयाश्रमाः॥ आलस्यमोहनस्मृतयो धृतिश्चिंता मतिस्त्रपा॥
आवेगहर्षचापल्यजाड्याः गर्वविषादनौ॥ स्वप्नौत्सुक्यावहित्थोग्रनिद्रामर्षौ मतिस्तथा॥ अ
पस्मारसंत्रासबोधव्याधिवितर्ककाः॥ उन्मादश्च समी त्रिंशत्त्रयश्च व्यभिचारिणः॥ रजस्तमो
निर्हीनस्य शुद्धसत्त्वस्य चेतसः॥ धर्मो निगदितः स्थायी रसो यो ध्यानतां गतः॥ विभावाद्युदयफले
नानार्थकंयास्समारपि॥ स च नवविधः॥ रतिहासोत्थशोकः क्रोधोत्साहौ भयानि च॥ जुगुप्सा
विस्मयसमाः स्थायिनो नव कीर्तिताः॥ सवुभिर्व्यंजकैरेभिः प्रबंधे चाहृतांतरैः॥ आस्वादांकुरकंदोसौ
भावः स्थायी रसायते॥ यदुक्तं॥ साधारण्येन विज्ञातैर्विभावाद्यैर्विविश्रितः॥ श्रुतवेद्यांतरः स्थायी
चमत्कारी सुखं रस इति॥ आनंदो रसविभावाद्यैर्वलिष्टैर्नन्न संज्ञिति॥ आत्मरत्यादिवछिन्नो रसः स्या
दिति केचन॥ स च रसो नवविधः॥ शृंगारहास्यकरुणरौद्रवीरभयानकाः॥ बीभत्साद्भुतशांताश्च न
वाचार्यैरसस्मृताः॥ श्यामश्वेतधूम्रारक्तगौरस्तथैव कालश्च॥ नीलश्च पिंगलश्च सितश्च क्रमाद्दमी
बोध्याः॥ नंदात्मजहलिसीतापतिर्भार्गवकल्किनः क्रमतः॥ किरिबुद्धकूर्मकपिलाश्चापि रसानां र
स्मृता देवाः॥ इति रससामान्यनिरूपणं॥ अथ विशेषेण ते निरूप्यंते॥ तत्र शृंगारः प्रोक्तो मनो

काव्यकौ॰ नुकूले रतिश्चानुरंजनं ॥ शृंगारस्थायिनोमतिः कांतलेर्ध्यस्य तस्य तत् ॥ कांतादन्यत्र तत्स्त्रीनिः यथा बाल्याः
७ श्रीहरौ यथा ॥ यत्रैतौ सखी युवस्वियु मैत्री तस्याः परस्परं ॥ यत्र स्पर्शश्च हासश्च जायते मुदीरते प
संयोगो विप्रलंभश्च शृंगारो द्विविधो मतः ॥ तत्र संयोगः ॥ रतिर्याविना बाधैरुचितैर्व्यक्तिमाग
ता ॥ आलिंगनादिहेतुश्चेत्तदा संयोग उच्यते ॥ यथा ॥ लेमुग्धा स्विन्ने वक्त्रं चुलिकयाध स्मेन्मनोहा
रिणी ॥ लक्ष्मीमित्यभिधाय निश्चि वनमेतद्वीटिकासंस्पृशि ॥ शय्यायां तनिविष्टसस्मितवधूनेत्रोत्स
वानंदितो निर्यतः शनकैरलीकवचनोपन्यासमालीजनः ॥ यथावा ॥ सख्या स्तवीनं गरणेनमवैं
धुनाननर्त्तमुक्तावलंतिकायस्तनोपरि ॥ उत्कुसयस्याः सखिनायकश्चलोधीरं मुहुर्मुमिश्रिनहारंको
स्तुनं ॥ मिथ्यावलोकमाध्वीकपानादिवं कुधाद्यसो ॥ मिथ्यावलोको यथा ॥ एहीति प्रस्थगसखीर
लोकेतवेन ॥ मा हित्वा यो मयि तया निहितः कटाक्षः प्रस्तस्त्रवन्मसकटास्तं मवाप्य शांतोप्युत विं
मदृसनिक्तत्तशरा इवन्मु ॥ एवमन्यत्तद्ध्यां ॥ अथ विप्रलंभः ॥ अयुक्तयोयुक्तयोर्वा यूनोः श्लेषा ॥लिंगनादिश्रुता बतः ३
र्घ्यजोवतः ॥ प्रकृष्यति रतिः सो वै विप्रलंभ स्तदोच्यते ॥ पूर्वरागस्तथा मानः प्रवासश्चेति सत्रिधा ॥
तत्र पूर्वरागः ॥ रतिर्यासंगमात्पूर्वं पूर्वरागः सकीर्त्यते ॥ इंदीवरोदरसहोदरमेदुरश्रीर्वासोऽद्वलंकन
॥यथा॥
गं: प्र१
७

कर्त्तुं दृनिजं रदधानं ॥ आमुक्तमौक्तिकमनोहरहारवक्षाः कौसुंभसुवासा जगदङ्गनंगमयं करोति ॥ यथा वा ॥
कनकाद्रिनिकेतकेतकीकलिकाकल्पकलेवरद्युतिः ॥ हरिरेष मुदिरालिमेदुरे चपलामां किमु
त्वं करिष्यति ॥ अथ दशदशा ॥ लालसोद्वेगजागरास्तानिता जवव्याधिजागराः ॥ उन्मादस्य ग्रता मोहा
मृत्युश्चेति दशा दश ॥ मृत्युशब्देन मूर्छोच्यते ॥ अथ मानः ॥ एकत्र स्थितयोर्यूनोरन्योन्यमनुरक्त
योः ॥ रतिश्चेद्बाधिता तुच्छत्तदा मानः प्रकीर्त्तितः ॥ यथा ॥ स्वप्ने व्यलीकं [illegible] मालिनो कं धपा
ली स्तुपाकल्पे विवर्णवक्त्रा ॥ श्यामांविनिश्वस्य मधुत्रियामां सह स्वयामामिव सांप्रतं नैषीत ॥
जिह्वे तु कामनोगम्यः ॥ अथ प्रवास ॥ यथा ॥ सुधा सुधांशुकिरणे जालगते नवनदाहचकितासी
॥ आहातुं मवधिलेखं प्रविशति नवनं निवार्य्य सहेर्ष्यसहयांती ॥ अथ विनानायकभेदाः ॥
धीरोदात्तो धीरोद्धतश्च धीरप्रशान्तश्च ॥ धीरललितश्चेति चतुर्विधो नायकः प्रोक्तः ॥ तत्र प्रथमे
धीरोल्लक्षणं निपुणं लक्ष्यालि चा ॥ विनयी क्षमी गंभीरो निगूढगर्वो महासत्वः ॥ श्लाघाशून्यः श्रु
नवान्धीरोदात्तो दृढव्रतः कथितः ॥ यथा ॥ वीरं मन्यमदप्रहारि हसितं घोरं यमालोकितौ । निर्व्यूढ वू
व्रतमुन्नता । क्षितिधरोद्धारेण धीराकृतिं मण्डनं कृतकिल्बिषमपि मधुरं स्तुत्यामुकुर्यं चितं प्रस्प

लोभमदुर्विनीतं हृदयं धीमीश्वन स्यंदने ।। सम्लाघानिरतो मायी मत्सरी क्रोधनश्चलः ।। अहंयुः कथि
तो धीरोद्धतो सो रसवेदिभिः ।। यथा विक्रान्तच्छिन्नमन्निच्छ विमर्छन्मूर्छद्दुरः ।। प्रसर्पन्क्रुध
सर्पस्त्वा न सम्यक्सं घससहणः ।। विनयी विवेकयुक्तो विपत्सु सहनश्च शांतश्च ।। धीरप्रशांतसंज्ञः
कथितो मुनिभिर्धर्मिष्ठः ।। यथा ।। रक्तवर्णधर्मनिरतानिजप्रजाप्रति रंजयन्ननुगतं क्रियोदयः
।। हरिभक्तिरसपरितुष्टमानसः पृथिवीं प्रशास्ति नृपतिर्युधिष्ठिरः ।। परिहासपरः प्रमदुलः क
लाकपाप्यापो चित्तरूणः ।। कोता वश गश्चिंतारहितो कथितो धीरललितो यं ।। यथा ।। सु
प्रेरांग्रजनतरुणीचलालकोलो संपश्यन्मधुरिमनोरसं नतांगी ।। सानंदः पुलककुलाकुलो
ज्वलच्छ्रीः ।। श्रुत्वा तेश्नु नवति व्याधवश्चकास्ति ।। एषोऽनुकूलदक्षिणशठधृष्टतया चतुर्विधो धीरललितो नाय
भिमतः ।। निखिलाश्चतुर्विधास्तु स्त्रनामी षोडश प्रोदिताः कोविदैः ।। अनुकूलादीनां लक्षणानि क ५
एकाश्रितोऽनुकूलः समः समस्तासु दक्षिणः केश्रो ।। शठ एकस्यां रागो बहिः परस्यां धृतप्राये लेह ३
सापराधोपि २ य ।। सभर्तुरपि निःशंकस्तर्जितोपि न लज्जितः ।। दृष्टदोषोऽपि मिथ्यावाक्प्रोक्तो सो धृष्टनायकः
इति लक्षणानि ।। इति नायकभेदाः ।। अथ सामगुणाः ।। श्रीमान कृती कृतेज्ञश्च रूपयौवनमे

एकालस्माति मंगपानिः ।।

नमंडितः ॥ त्यागी दृढोनुरक्तश्च तेजस्वी चतुरः सुधीः स्यादयः ॥ शोभा विलासो गांभीर्य्यं स्थैर्य्यं माधुर्य्य
तेजसी ॥ औदार्य्यं ललितं चेति सत्वजस्यात् गुणाष्टकं ॥ तत्र शोभा ॥ नीचे कृपाधिके स्पर्द्धा सत्स शौर्या
दिदृक्षता ॥ उत्तमस्यानुरागश्च शोभायां मिलिता इमे ॥ यथा ॥ स्वर्गध्वंसं विधित्सुः अग्रेजनुषि कदनं सु
१८उद्दीनः४ दृष्टीश्यानि दृष्ट्वा नीचानालोक्य पश्चान्नमुचिरिपुमुखान् ढकारुण्यवीचिः ॥ अग्रेहस्य स्वचतुल्यं क
समानिप्रायात्र५ मपिनिजरुषामत्रमर्य्यैर्मिपात्रंवंधुनानंदयिष्णुरहरत हरिः सत्ससं धाम हार्दि ॥ अथ विलासः ॥
कल्यनं रम्यवेशाद्दर्विलासः विलासः कृष्णतेबुधैः ॥ यथा ॥ विचित्रगुंजागिरिधातुचित्रैर्विभूषितो
मोसविविनिर्मुरारिः ॥ स्वयं च साकौतुकनः कलावान् विभूषं स्तैर्विजहार सार्द्धं ॥ गांभीर्य्यं ॥ भीका
पशाकहृञ्जाधिगांभीर्य्यमतिकारिता ॥ यथा ॥ नोकृष्णते किमुकथाविसमायदिस्यान्नोगोप्यता यदि
मवेकिमुगोपयः ॥ आत्मसमानद्वहृद्गुणएषभावः ॥ कृस्नस्यकामपिदृशालजतेनविमः ॥ स्थै धैर्य्यम्॥स
र्वे ॥ स्वनिश्चयादचलनं स्थैर्य्यं विघ्नेनमत्यपि ॥ यथा ॥ प्रतिकूलेपिश्मूलेशिवेशिवायां निरंकुशा
छेदितवानर यांच ॥ अलुनादेव मुकुंदो विधावलिनंदनचुजानन् ॥ माधुर्य्यं ॥ सर्वधाम्नहलीयतंमाधुर्य्यं परि
कीर्त्तितं ॥ यथा ॥ निरस्यरत्नो मरणामाधवः ॥ प्रसंतनपत्रादिजिरणवन्यैः ॥ अलंकृतश्चारवजा

श्रेवकनपनं हृषिदितिद्दुत्तायुध:२

तेज!

शोभा नारम्यत्वहेतुमकत्वं हि रम्येषु॥ अथ स्नातोद्रेकसहनं तेजः सद्भिरुदीर्य्यते॥ यथा॥ व्रजाधिपेश्वरसु
तेच कंसेनाकुश्यमाने किल निश्चेतायः॥ चक्रुर्द्विषु गर्भमधिस्थिति निर्यत्स्य स्वकीया स्वामी वकः पक्षे कंसस्यर
हरिर्विजानाति॥ औदार्य्य॥ मित्रामित्रेषु यत्साम्यं तदौदार्य्यं प्रकीर्त्तितं॥ आपीयपूतनायाः सद ॥यथा॥
चरजननीगलस्य च स्तन्यं॥ स दृष्ट्वा समसमेव दत्तो जननीत्वं यः स एष वः पायात्॥ ललितं॥ शृं
गारप्रचुरा चेष्टा ललितं कथ्यते बुधैः॥ यथा॥ विपिनलतारत्नकुसुमैर्विभूष्य राधां हरिः प्राह॥
त्वं सुमुखि कल्पपल्लवप्रलयवती कुञ्जदेवताकापि॥ इति नायकगुणाः॥ अथ तत्सहायाः॥ नायक (मोहवन ६)
स्य सहायाः स्युः सखायस्तत्पुरुषे चान॥ रहस्यज्ञाः प्रियसखाः प्रियनर्मसखास्तथा॥ दूताश्च त्रिविधा
स्तेषु विसृष्टार्थमितार्थकं॥ संदेशहारकश्चेति स्फुटमग्रे भविष्यति॥ इति सहायाः॥ अथ नायका
भेदाः॥ परकीया स्वकीया च नायका द्विविधा॥ ऊढानूढा च तत्राद्यौ द्विविधा परिकीर्त्तिता॥ अनूढा परकीया।
वर्जयित्वात्र द्विविधा नायका तु या॥ मुग्धा मध्या प्रगल्भा च प्रत्येकं त्रिविधा मता॥ धीराश्च सु
धीराश्चाधीराधीराश्च नायकाः॥ मुग्धां विहाय तेनैता बुधैः पंचदश्योदिताः॥ लौकिके परकीया
तु कन्यैवाभिमता नवेत्॥ अलौकिके परोढापि कन्यैवा स्यानन्यैव सम्मता॥ शततावि शतिश्चरव

९

स्यान्निस्याष्टभिः॥ तत्रा कन्या॥ पित्राद्यर्पणतः पूर्वं तत्रादृश्यसंमुनो॥ ज्ञातानुरागकन्या चेत्परकीये
वसंमता॥ दुर्गार्चनपरा कन्या यथा श्रीगोकुले स्मृता॥ अन्योढा॥ अपि स्नेहाद्गोविंदे पितृविभ्र
दा॥ अनपेक्षितमध्यमाश्च परोढा ज्ञेया एव तः॥ करग्रहविधिं प्राप्ता नतुर्वचनूलसरा॥ स्वकीयाः
कथिता स्तास्तु पार्वस्यां रुक्मिणीमुखा॥ अथ मुग्धादीनां लक्षणानि दिङ्मात्रेण लक्षणानि च॥ त्र
थमावतीर्णतरुणिमा मदनविकारासखीवशगा॥ माने मृदुः सलज्जा दुःसहसुरता नवमुग्धा॥
तत्र प्रथमावतीर्णतरुणिमा यथा॥ धावत्या क्रमितं जवात्सरि सरंश्रुत्यारपांगद्वयी पोष्कल्पं
हरतः कुञ्जावलिगुणेरावध्यमध्यं ततः॥ गृहीतश्च लतां मुखो चरणयारुः घर्दनुर्विभ्रमे राधा
त्रिवलि यास्त्वनुपत्तनेनरूपतो वाल्यान्निवेशीयते॥ दुःसहसुरता यथा॥ नवसंगमलोलसेननेत्रा
मध्यस्थानं १ मृगनेत्रा विस्मिता स्मितांचितभ्रू॥ वरवंदनकल्पितेदिरे साम्मुखचंद्रकृतसीत्कृतं वृजारे॥ मध्या
विलसिततरुणिमसुरतिजरायांत्र लमितक्रीडा॥ इयस्वगल्भवचनाजिगूढचातुर्य्या कंप्राका
तत्र विलसिततरुणिमा यथा॥ वायोकिंकिणिमाहरत्सुपचयं ज्ञातानितंवो गुणैः स्वस्पर्धं समवेत
वक्षि वलिनिर्याणं सम्मधमं॥ वक्षः साधुफलद्वयं वितनुतेराजोपहारक्षमं राधायाः स्तनु

आप्रवतिसति

स्फ्रमादेर

काव्यको० राज्यमंचतिनवेन्हीपणीर्वतो यौवने ॥ निगूढचातुर्य्ययथा ॥ हरोपरीरंभकलाविलासेनानेतिमा
मामधुरंवदंती ॥ श्लेषणत मुंचेस्तमथापि रंजैयथापरानंदनिधौनिमग्नः ॥ मध्याधीराप्रियंव
१० क्तिसागसंवक्रभणितिः ॥ यथा ॥ यद्भिन्नहृत्कुमुद्वतीकिलसेवसत्यं सत्यंनवाम्बु मधुसूदनएव
मन्ये ॥ वामेनतामसुखयज्जितशिदसेनप्रातः प्रबोधयसि मामपि लोचनेन ॥ अधीरासागसंकां
वक्र५ तंनिरस्यति परुषोक्तिभिः ॥ यथा ॥ सोचिकंधरमधुंकिमीलसे पातुमातु सखिहस्तनाईनिः ॥ वाम
रीतिचतुरांह्विपामरीसवलांपरमदेवतामिव ॥ धीराधीरातुवक्रोक्त्यासबाष्पाचाभवेत्प्रियं ॥ यथा
नीलाहरिदृष्यलिमंदिरेप्रियया ॥ दृष्ट्वान्यनागांकमुवाचबाष्पला ॥ नसंकुचलंकिलपंकजेसखेप्रती
यसेत्रेवमुपागतोयतः ॥ गुरिनामदनमदाधारनिरतोनिपुणासुभूर्णातारूपा ॥ नावाल्मनाप्र
गल्भाविदग्धाक्रांतवल्लवाज्ञातकनिनिः ॥ तत्रमदनमदांधायथा ॥ निर्गतिरतिगृहात्सखीगणेयु
क्तिमप्यकृतमाधवोमयि ॥ नाविदंसखिसमस्तमेवतत्सोख्यंसिंचिनिमज्जनादृहं ॥ वैदग्ध्याक्रां
तवल्लभायथा ॥ श्लिष्टाश्लिष्यतिकांतेचुंबितांतंविचुंबति ॥ लिखितानखरेल्लंचीलिखंत्य
पिनहीयते ॥ प्रगल्भायदिधीरास्यात्सावहित्थावहेलया ॥ उदास्तेसुरतेतांकोपादादरंदर्श

अकारंग्राहितानादरेण ।

यथाकृत

यथा ॥ यामिनीवनाघनाहं रुधा मिमाल्यावराते वितथं ॥ इत्थं प्रेयसि विनयागर्नीरिका समारु
षंरा मांधा ॥ अधीरा ताडयेत्कांतं मतर्ज्यपरुषा किंचिर्यथा ॥ आजन्मयो विदधत्ल थदीसः प्रयाहि
मे प्रांगणेतो मुकुंदः ॥ इति भुवा णोनि रुषारुषारुणा सोजयानलीला कमलेन कांतं ॥ धीराधीरा
प्रगल्भा वधुक्तास्यादुनयोगुणैः ॥ यथा ॥ साहो दन्ति निजीवितेमम रूपशशं तमालं वसधि
कत्वां मां वधिगणयं यैः सुजनतां धिक्प्रमधिकृतयशः किं ब्रूमः पुरुषो नमो सिजगतो नत्वा
सिमध्येवतेषु त्वं न हितननगुणगुणैः किंचित्तरंगीमते ॥ अथासामवस्थाः प्रोक्तानि सा
रिका विप्रलब्धा च सकसज्जिका ॥ विरहोत्कंठिता तद्वत्कलहांतरिता यथा ॥ प्रोषितो प्रेयसी
खंडीताथ स्वाधीनजतृका ॥ क्रमेणासंल्लक्षणानि ॥ यान्ति सा रयते कांतं स्वयं वा निसरत्समु ॥
जरनी याग्पवेशा सा बुधैरुक्ताभिसारिका ॥ यद्यनेकृतसंकेतेप्राप्तसनिर्दैवतः ॥ यस्यमानम
नाया स्वा दिप्रलब्धा तु सा स्मृता ॥ वेशभूषणलीलां तुल्यं पुष्पावेवास मंदिरे प्रसुसज्जानी स्पतेया
तु कांतं सा वसकसज्जिका ॥ हेतुना केनचित्कांते नैविलंबेनिरागसि ॥ समुत्सुकान वधा तु वि
रहोत्कंठिता च सा ॥ ४ ॥ कांतेषा दागतं को पान्निरस्यानंतरं तु या ॥ संतापं तनुते स्वस्यात्कलहां

काव्यकौ.
१२
॥

तरितास्मृता ॥५॥ वहुकार्यवशाद्यस्या दूरदेशगतः प्रियः ॥ तदनंगतिदुःखार्त्ता सा स्यात्प्रोषि
तभर्त्तृका ॥६॥ उषित्वा मंदिरे यस्यास्तज्ञांगनोकयुत प्रियः ॥ प्रातर्यदृच्छमागच्छेत् खंडिता सा रुषाकुला
॥७॥ कांतो रतिगुणाकृष्टो यस्याः पार्श्वं न मुंचति ॥ स्वाधीनभर्त्तृका सा स्यात्तदर्पितमनस्तनुः ॥८॥ ए
तासामुदाहरणानि तु स्फुटत्वाद्ग्रंथविस्तरभयान्न कृतानि ॥ अथासां नायिकानामलंकाराः ॥ अ
लंकारास्तत्त्वजाः स्युर्विंशतिर्यौवनोद्भवाः भावो हावश्च हेला स्युः अंगजाः परिकीर्त्तिताः ॥ शोभा कांतिस्तथा
दीप्तिर्माधुर्यं च प्रगल्भता ॥ धैर्यमौदार्यमित्येते सप्तैव स्युरयत्नजाः ॥ लीला विलासो विच्छित्तिर्विभ्र
मः किलकिंचितं मोट्टायितं कुट्टमितं विब्बोको ललितं तथा ॥ विहृतं चेति विद्धि दशांशोभाकाः स्वभा
वजाः ॥ तत्र भावः ॥ आद्यो विकारो भावः स्यान्निर्विकारस्य चेतसः ॥ यथा ॥ आधूलिकेशि नैशतशः
निरांक येन पयंशगल्यचारुसुंदरं कलहायते स्म ॥ तस्यामसुंदरमपूर्वमिवेक्षमाणे सा गंडयोः पुलक
मंडलिकां तनोति ॥९॥ हावः ॥ नयनादिविकारेण व्यक्तो भावो हावतां व्रजेत् ॥ असौ भावः ॥ यथा ॥ लोलेन
किंचिदुल्लसेन न किंचिदद्दक्षणेन सा यद्विनेदहृदयं व्रजराजसूनोः ॥ तस्यास्त्वदैव हृदयेन समं तदंतस्ते
नाधुनैव नु विवेशनवोनुरागः ॥ हेला ॥ अनिलस्पे विकारे तु हावो हेला स्मता बुधैः ॥ यथा ॥ एकमप्य

तिरंहोपितमेकाप्यु-सुकारवविनाहमपश्यं ॥ कोमलत्वं कुवलयादपि हन्यात्सहसेन कृतमेन कटाक्षः २
क्षणेन ॥ ४ ॥ सेव शोभा नाम चरू रूपालावण्यादिभिर्ह्यर्जिता ॥ सेव हेलैव यथा ॥ धत्ता रक्तांगुलि
किशलयैर्नयिशाखां विशाखा ॥ निष्कामंती जलेति भुवनान्यालकच्छुरिता द्दी ॥ वेणीमं सो परि वल्ली ३
विलुठितामर्द्धमुक्तां वहंती लग्ना स्वांते मम मनसि हि बहिः सापि सैवाश्रमासीत् ॥ ५ ॥ कांतिः प्रदीप्ता
महन्माशा सैव कांतिरुदीर्य्यते ॥ सैव शोभेव कीवेदूरे सखि ग्लानिगच्छति ॥ दृष्ट एव कावेदजी ॥ यथा ॥
वमपनेष्य लग्न एव प्रंरखालिभिः परिमलैः सहसांधया सोशपमोरसपरिचितो बद्धकोपराधः
॥ ५ ॥ तपो शोभाचिस्तीर्णसैवादीप्ति स्मृता बुधैः ॥ सैव कांतिरेव ॥ यथा ॥ रूपश्रियं मूर्त्तिमतीमि
वप्रियां मनोहरं तं स्मितवीक्षणामृतैः ॥ तां रत्नपर्य्यंक गां नतं क्रवं पश्यन्नमंदं माधमाधवः ॥ ६ ॥
माधुर्य्यं ॥ सर्वावस्थासु चारुत्वं माधुर्य्यं परिकीर्तितं ॥ यथा ॥ अलावदगादच्युतमेखलायाः शैवालवे
लैव ववन्नोनितंवः ॥ अंकेन तं वं स्तपमहेतुत्वाई सर्वास्ववस्थासु सदैव रूपं ॥ प्रगल्भता ॥ निःशंक
त्वं प्रयोगेषु बुधाः प्रागल्भ्यमुजगुः ॥ यथा ॥ ग्लिष्टाग्लिष्यति कांतेनेत्यादि ॥ ७ ॥ धैर्यं ॥ धैर्यं स्या
दविकारित्वं सुखदुःखेमहत्स्वपि ॥ यथा ॥ मनवयोवनपूर्णवापी कार्यीयमत्रेन करोमि निमज्ज

नेछो ।। इछामितं कमपि काल्लन लज्जमुच्चैराकंदिलुं सुमुखि हास प्रियसख्याप्रियेति ।। ८ ।। औदार्य्यं ।।
सर्वदा विनयो विज्ञैरौदार्य्यं समुदाहृतं ।। यथा ।। गुणमणि रवनि रूप्यसे ।। मुरारि र्मयि कुरुते क
१४ रुणां यदघकांत: ।। अविरल कलहांचि बुधि हृत्तो नदिह सखी निकरस्य सुप्रसाद ।। १० ।। लीला
कांतानुकरणं लीलाऽस्य वेशक्रियादिभि: ।। यथा ।। मृगमदकृत चर्चा पीतकौशेयवासा ।। रु
मिखाचूडाय चिर शिखिखंडा बद्धधम्मिल्लपाशा ।। अनृजुनिहितमंसे वंशमुत्क्वाणयंती धनमधुरिपुवेशा
मालिनी पातु राधा ।। ११ ।। विलास: ।। विशेषो दयितालोके मुखनेत्रादिकर्मण: ।। यानस्थानास
नादेश्च विलास: कथितो बुधै: ।। यथा ।। कांतमाभात मालोक्य मंदिरं मदिरेक्षणा: ।। सस्मितास
हसोतस्थौ गंडसंचलकुंडला ।। १२ ।। विछित्ति ।। स्वल्पापि वेषरचना विछित्ति धुनिपोषकृत ।। यथा ।।
मुक्ताविलंबिनासा मणिकंकण चारुपाणियुगला सा ।। शोभा दधार राधा रसिकमणेर्मोहिनी म
वलं ।। १३ ।। विभ्रम: विभ्रमयासि प्राप्ते भूषास्थानविपर्यय: ।। यथा ।। अधात्कांचीकंठे जघने मुक्ति
हारं चरणयो: कृशांगी रकेयूरे भुजलतिकयोर्नूपुरयुगं ।। किमंगेरन्यो न्यं मधुमथन संगोत्स

भुजबंध१

विविधोऽसमाहारो मातनेप्रणयपिशुनः स्वस्वविजवैः ॥१४॥ किलकिंचितं गर्वस्मिताभिलाषाद्देनीकोपादेश्च
मिश्रिणं ॥ प्रेमोद्वासेयसः संगेः कथ्यते किलकिंचितं ॥ यथा ॥ न्यस्ते वयस्यापुरतः करांजे वक्षोजयु
ग्मोपरि माधवेन ॥ सा गर्वकोपस्मितभीतिलोलं तद्वाहृयत्तस्य मनोजहार ॥१५॥ मोट्टायितं ॥ प्रसक्तिरभि
लाषस्य कांतवार्तासु चेद्भवेत् ॥ रोमांचस्मितजृंभाद्यैस्तदा मोट्टायितं स्मृतं ॥ यथा ॥ राधा वाधामूलं
न सा सखीभिर्जगाद दृष्ट्वा ॥ जृंभते किल हरिचरिते मुकुंदजंजे सरोमांचौ ॥ कुट्टमितं ॥ दयिते कुचसं
स्पर्शमुखचुंबादि कुर्वति ॥ हर्षानंदो बहिः कोपः स्मृतं कुट्टमितं बुधैः ॥ यथा ॥ स्तनकनकघटीपटी
मुहुस्स्पृशति हरौ वकुनंगिमंगुरभ्रू ॥ इयमसरससवाणिः पाणिरोधात्कलकरुपापरुषा कषा
यितांभृतं ॥ विब्बोकः कथ्यते गर्वादिष्टे वस्तुन्यनादरः ॥ यथा ॥ प्रियोक्तिलक्ष्येण विपक्षसंनिधौ
स्वीकारितां पश्य शिखंडमौलिना ॥ भीतिधामा हृदयंगमापि स्रजं द्राधायनिरासहेलया ॥१८॥ ललि
तं ॥ सुकुमारांगविन्यासो ललितं समुदीर्यते ॥ यथा ॥ प्रसूनलल्योहरसंगदूनं नूनं वपुर्मे सखि ने
तिनिघ्नं ॥ इति स्मरयासु विशीचिंतासखीधियासो हरिमालिलिंग ॥१९॥ विहृतं ॥ त्रपादिभिरनु
क्तस्य वक्तुमिष्टस्य चेद्भवेत् ॥ प्रकाशचेष्टया प्राज्ञैस्तदा विहृतमुच्यते ॥ यथा ॥ निशम्य मय्यमु

काव्यकौ॰ कुंदमद्भवस्पर्धितमत्र सुंदरी ॥ न गिरा न जितेन नंदकिं तु सा पुलकेनैव कपोलशालिना ॥२०॥ इत्यलं
१३ कारा: ॥ अथ सखी: ॥ नायकानां सहायाः स्युः सखास्तासु तु कांचनः ॥ संमता प्रियसख्यश्च प्रि
यनर्मादिकास्तथा ॥ निर्हेतुकाहिताचाराः शरदश्वपः सुखदुःखयोः ॥ अन्योन्यहृदयज्ञाश्च सख्यः संप
रिकीर्तिताः ॥ प्रियसख्यस्तु ताः प्रोक्ता या युक्ता रसनर्मणि ॥ प्रियनर्मादिकास्तास्तु याः स्वच्छायवत्
स्थिताः ॥ एताः प्रायेण दूत्यस्तास्त्रिधाः कथिता बुधैः ॥ निसृष्टार्था मितार्था च तथा संदेशहारि
का ॥ द्वयोरिंगितमादाय स्वयमुत्तरदायिका ॥ सुश्लिष्टं कुरुते कार्यं निसृष्टार्था निगद्यते ॥ मितार्था
प्रतिलं वक्ति कार्यांतं या नियच्छति ॥ यथोक्तं या वदेद्वृत्तं सा तु संदेशहारिका ॥ इति सहायाः ॥ अथ
स्वयंदूती ॥ औत्सुक्यादनुरागाद्वा यांत्रया त्रपशान्त्स्वयं यदि ॥ भनक्ति स्वाशयं कांते स्वयंदूती तदा न
वेत ॥ यथा ॥ पुष्पमार्गणमनोरथोद्भवाः कुसुमंजुलतया तवानया ॥ रक्षितास्मि सचिका सखा पुरोवि
स्फुरन्मुमन संकुरुध्व मां ॥ इत्यालंबनविभावाः ॥ अथोद्दीपकाः ॥ प्रासादानिष्कुटावाद्यश्चंद्रिका
नवमल्लिकाः ॥ स्त.तवो मंदवाताश्च बुधैरुद्दीपनाः स्मृताः ॥ अथानुभावाः ॥ कटाक्षस्मितहास्यमूलव्य
क्तिः स्वजनसिंजितं ॥ कर्णकंडूयनव्याजसंभ्रमाद्यंगसंवृतिः ॥ सख्याश्लेषादिकं चैवत्याद्यनुभा १३

वयदेरितं ॥ अथ सात्विकाः ॥ अष्टौ स्तंभादयः सर्वे सात्विकाः समत्विकंतादृशा ॥ निर्वेद म स्तुपस्मार्य
नूवर्जयित्वा पुरोदिता ॥ यथार्हं त्रिंशदेव स्युः शृंगारे व्यभिचारिणः ॥ निजोचितैर्विभावाद्यैरेवं व्यक्ति
मुपागताः स्थायी सचेतसां चित्ते रतिः शृंगारतां व्रजेत् ॥ उद्दालं मुग्धाक्षी रित्यादि ॥ इति शृंगारनि
रूपणं ॥ अथ हास्यः ॥ विकृताः विकृतावेषे हासश्चित्तस्य विस्मृतिः कथितः ॥ उचितैः सविभावा
द्यैर्व्यक्तिं नीतः स्मृतो हास्यः ॥ यथा ॥ रामो यमस्कावकमतीव मानदः कपि प्रियाणां गुणरूपचेष्टि
तैः ॥ इहोरतुल्यातिशयैः सहानुजः किं कस्य नास्मान्सुखयत्यपृच्छता ॥ करुणः ॥ चित्तक्ले
शातिशयः स्वेष्टवियोगादिभिर्निवेच्छोकः ॥ उचितैः सविभावाद्यैर्नीतो व्यक्तिमतः करुणः ॥ य
था ॥ कृष्णं कालियवद्धं तदा विचेष्टितेगो पाः ॥ अतिदुःखितानिर्येतुर्विभिन्नमूर्त्ताधियाः सर्वेग
प्रायाशा विधते यत्र करुणस्तत्र संमतः ॥ इदृगर्गादि वाक्येभ्यः संततं विलसत्यसौ ॥ रौद्रः ॥ प्र
तिकूलता जन्मादि ॥ चित्तज्वालो भवेत्क्रोधः ॥ व्यक्तः सविभावाद्यैर्योग्यैरौद्रो रसः कथितः ॥ यथा
व्रज धियेद्दत्यादि ॥ वीरः ॥ श्लाघ्यफलेषु रूढो चित्तासंगः स्थिरः स्त्वरितः ॥ उत्साहः सतु योग्यैर्व्यक्तो
विभावाद्यैः ॥ यथा ॥ तुरगहनुसुतांगन्या वभेदे दधानः कुलिशघटिततटकोदंडविस्फूर्जितानि ॥ तदुरु

काव्यकौ. विकटदंष्ट्रोन्मृष्टकेयूरमुद्रः । अथ यतु कुलिशं लंबः शवो वामबाहुं ॥ दानवीरो धर्मवीरश्चोह्यं भयान
१४ कः ॥ घोरे क्षणे द्विभिश्चित्तचापल्यं भयमुच्यते ॥ उचितैस्तद्विभावाद्यैर्व्यक्तो भयानकः ॥ यथा ॥
आविष्कृतं विश्ववपुर्विकारिणा निरीक्ष्य दंष्ट्राविकटं कपिध्वजः ॥ तुषारस्रुब्धदरनीरजाननस्त्र
१५ स्यन्मनानेव शशाक भाषितुं ॥ बीभत्सं श्रहृद्यवस्तनुभवाज्जुगुप्सा हृदि मुद्गणे ॥ उचितैः सविभा
वाद्यैर्व्यक्ता बीभत्स उच्यते ॥ यथा ॥ घनरुधिरमये त्वत्रापि नद्धपिशित शितमिश्रित विस्रगंधभा
जि ॥ कथमिदममलां बुधः शरीरे भगवति दंतरतेर्लवि[illegible]र्णे ॥ भयानके यबीभत्से भगवद्दत्तिमि
श्रणे तु ॥ भवेद्दानं द्रूपलं भिति प्राकृमेनीषिणः ॥ अद्भुतः अलौकिके क्षणे धुत्था ॥ विस्मयश्चित्त
विस्तृतिः ॥ उचितैः सविभावाद्यैर्व्यक्तिं नीतोऽद्भुतः स्मृतः ॥ यथा ॥ वदने निजबालस्य कुड्मपंकजसं
निभे ॥ विश्वं सग्रजमालोक्य यशोदा चित्रिता बभौ ॥ शांतः ॥ शमस्थायी भवेच्छांतो निर्वेदस्थायि
कः क्वचित् ॥ क्रमेण दा० ॥ गोविंदं सुखसिंधुं चेतन्यघ्रद्दृद्धायन् अंभोधिरिवासुनितांमार्कंडे
यो मुनिर्जयति ॥ स्ताचकास्तवचतुर्मुखाद्या भावकाश्च भगवान्भवादयः ॥ सेवकाः शतमखा
द्यः सुरा वा सुहृद्वयादिकेत द्भावया ॥ अथ रसानां विरोधः ॥ आद्यस्तु करुणबीभत्सरौद्रवीरभ

अथैषां मैत्री वीरस्याद्भुतरौद्राभ्यां सह मैत्री प्रकाश्यते भयानकस्य बीभत्सेनाद्भुतेन शृंगारेण तथा ३

यानकैः॥ भयानकेन करुणेन च हास्याविरोधभाक्॥ हास्योज्वलाभ्यां करुणे भयानके च रौ
द्रकः॥ वीरः शांतभयांकाभ्यां बीभत्संश्रुचिनासह॥ शांतस्तु वीरशृं शृंगा
रयोद्रहास्य भयानकौ॥ भयांकोहास्यशांताभ्यां वीररौद्रौ ज्वलैस्तथा॥ शृंगारहास्ययोस्तद्वद्वी
रशृंगारयोश्च सा॥ इति वरसानिरूपिता॥ अथ भावः॥ देवतानृपपुत्रादिविषया यारतिर्भ
त्॥ स भावो व्यभिचारी चेत्प्राधान्यं प्रतिपद्यते॥ यथा॥ सत्यानंतचिंत्यशक्तेकपक्षे सर्वाध्यक्षे
भक्तरक्तिदक्षे॥ श्रीगोविंदे विश्वसर्गादिकंदे पूर्णानंदे नित्यमास्तां मतिर्नः॥ विघ्ननादेवता
विषयारतिर्भविष्यविक्षुविषयानुभावश्च रतिश्च॥ देवत्वौतात्वादिना कांतत्वेनन्च भावके च तस्या
द्यात्॥ यदाह भगवान् कपिलः॥ मेधामदं प्रियं आत्मा सुखं च तस्य सखा गुरुः॥ सुहृदो वमिष्टमि
ति॥ प्रधानीभूतो व्यभिचारी॥ यथा चिंता मदीयं चिकुरनिपमुखांबुजामोदविलासिमुक्ते॥ तस्या समा
रूढकुचादि सानुरागमेणनाभी सरसीभासीत्॥ अत्र प्रधान्येन स्मरतरभावस्ततसाज्ञावत्सा॥ यद्यपि
न भावहीनोस्तिरसो न भावो रसवर्जितः॥ परस्परकृतासिद्धिरनयो रसभावयोरित्युक्तेः पर

मविश्रांतिस्थानेनरसेनसहितोव्यभिचारीतथा।।विकरग्रहप्रवृत्तराजनृत्यवत् प्राधान्यमसौ
भजते।।अथाभासः।।रसोभावोप्यनौचित्यप्रवृत्त्याऽऽभासतांव्रजेत्।।तत्ररसेस्थायीभावानु
भाववैरूप्यमेवनौचित्यं।।अनेकेन्निष्ठानुभयनिष्ठाऽगम्यागताचेतिस्तदास्थायितायां
तस्यावैरूप्यं।।वैदग्ध्यजल्पतोल्याभावोविभावे।।समायातिक्रमप्राप्यधाघ्र्यानिलनुभावा-
चेतिशृंगारेनौचित्यं।।हास्यगुर्वाद्यालंबनश्चेत्हासः।।वीरेब्रह्मवधविषयश्चेदुत्साहः।।रौद्रेगु
र्वादिगतश्चेत्क्रोधः।।भयानकेवीरेपुंसिचेद्भीतिः।।एवमन्यदूह्यं।।भावेतुकृत्रिमस्तुतित्रयादि
कमनौचित्यं।।तच्चवैरिवारयोषिद्गतंबोध्यं।।लक्षणोदाहरणानि।।अथभावशांत्यादयः।।भावस्य
शांत्युदयःसंधिःशबलता।तथा।।क्रमेणोदा-।।कांतंपादांतगंवीक्ष्यमानिनीविनतानना।।
अत्रामर्षशांतिः।।अन्येननमिपश्यंत्यारत्न्यापुलकितः।।अत्रहर्षोदयः।दृष्ट्वापतिसपत्नीचे
दिधेवाभूत्मृगेक्षणा।।अत्रहर्षेर्ष्ययोःसंधिः।।रुष्टःपतिर्मनोमत्तंस्वलोहृष्टश्चलोदोष्टव
लौकिकः।।मित्रवशाननरोस्त्रीचक्रंकुमहहकिमणाधुना।।अत्रजयचापल्यशंकासूयाभिःशा
बल्यं।।एककाव्याभासादिव्यंग्योदर्शितः।।तत्प्राणेवस्त्वादिव्यंग्यस्तूत्तमकाव्यमेवर्णनेव

क्ष्यते ॥ इति काव्यकौस्तुभे रसनिर्णयस्तृतीयप्रभा ॥ अथ रसधर्मानुगुणान्निरूप्यन्ते ॥ रसस्यो
त्कर्षका धर्मा वर्णादिव्यंजिता गुणाः ॥ अंगिनो रसस्योत्कर्षका धर्मा गुणाः यथात्मनः शौर्यादयः
॥ वर्णादयस्तु तेषां व्यंजकाः ॥ शौर्यादिना यद्वद्देहाय ॥ माधुर्य्यौजःप्रसादास्त्रयस्ते परिकी
र्त्तिताः ॥ क्रमेणैषां लक्षणानि व्यंजका वर्णादयश्च दृश्यंते ॥ चित्तद्रुतिमनोह्लादावुभे माधुर्य्य
मुच्यते ॥ संभोगे करुणे विप्रलंभे शांतेधिकं क्रमात् ॥ स्यात्स्ययुक् शिरसा वर्गोष्टवर्जरिफेण
लघू ॥ सुसमासोऽसमासश्च माधुर्ये घटना तथा ॥ शिरसि स्वं यं च मयुक्ताष्टवर्गविजो वर्णाः ॥ रेफ
णकारौ ह्रस्वांतावितिवर्णाः ॥ सुसमासो मध्यसमासः ॥ असमास ईषत्समासश्चेति समासः ॥
पदांतरयोगे घटना चात्र करुसगतामित्यादिरूपा ॥ एता माधुर्य्यस्य व्यंजिका ॥ उदा ॥ संततं संततनो
त्सस्यानितांतं तांतचेतसः ॥ दुरंतकांतचिंतेयं देहं तसं तापसंततिं ॥ दीपनं चित्तविस्ताररूपमो
जः परिकीर्त्तितं ॥ वीरबीभत्सरौद्रेषु संपात्यधिकतां क्रमात् ॥ दीपनं दीप्तिः ॥ द्वितीयतुर्य्ययोगः
पूर्वान्त्यौ रेणु तुल्ययोः ॥ शषौ टुट्ठौ दीर्घवृत्तिश्च घटनोद्धत्समाजसि ॥ वर्गस्य प्रथमतृतीयाभ्यां सह द्वि
तीयचतुर्थ्ययोर्योगः ॥ यथा कक्कवटीरुग्धासद्रत्यादि ॥ रेफेन सह व्यंजनत्रीस्पयोगः सर्वोपर्य

धनयत्रच यथा ॥ अर्कः कर्कः दुर्ग्रहः ॥ तुल्ययोगस्तेन तस्यैव ॥ यथा ॥ मत्तोहामादि ॥ शंसोट
ठडढश्चेति वर्णाः ॥ इन्नि दीर्घं दीर्घसमासः ॥ इढौ गुंफश्चेत्योजसोर्व्यंजकाः ॥ उदा ॥ उच्छ्वनमत्त
दैत्येंद्रहत्या वित्तनखोद्भट ॥ दंष्ट्रा कटकटात्कारक्रूरवक्त्रोवताद्धिनुः ॥ सितामिवांयुवुयश्चित्तं
शुष्कंधनमिवानलः ॥ व्याप्नोति सप्रसादः स्यात्सर्वत्र विहिता स्थिता स्थितिः ॥ शब्दाः श्रुतिगतास्तस्य
द्योतका वाच्यबोधकाः ॥ प्रसादस्य सर्वत्र कत्वान्न वर्णगतो नियमः ॥ उदा ॥ मनसः परमाणुं तां व
दंतः कथमद्यापि नतार्किकाः स्वपंते ॥ कनकाचलजित्वरस्तनीनां तरुणीनामपि यत्र संनिवेशः ॥
नवसी जन्मास्ति स्त्रोवस्थाः सहृदयचेतसी नवंति ॥ द्रुतिविस्तारो विकासश्चेति ॥ तत्र शृंगारकरुण
शांतेष्वाद्रुतिः ॥ वीरबीभत्सरौद्रेष्वो विस्तारः ॥ हास्याद्भुतभयानकेष्वो स्तुमुलमुखनेत्रगतिर्मनो वि
कासः ॥ गोणीशब्दार्थयोश्चापि वृत्तिरेषामुदीरिता ॥ एषां गुणानां ॥ इति काव्यकौस्तुभे गुणनि
रूपणं चतुर्थी प्रभा ॥ एवं गुणान्निरूप्य बहुवक्तव्यत्वात्काव्यजनेदानिधर्मत्वाच्च क्रमप्राप्तानप्य
लंकारान्विचारीतिमाह ॥ वर्णादिघटनारीतिरुच्यते गुणहेतुका ॥ वैदर्भ्यादिविभेदेन चानु
र्विध्यं भजत्यसौ ॥ अंगस्थानविशेषवद्गुणहेतुकावर्णविन्यासविशेषो रीतिः ॥ सा खलु वैदर्भी

गौडीपांचाली लाटी वैदर्भी चेति चतुर्विधा भवति ॥ आदिनासमासः ॥ क्रमेण संलक्षणानि ॥ माध्यवृत्तिर्
वृत्तिर्वामाधुर्यादिगुणान्विता ॥ वैदर्भी रीतिरेतस्याः पाकः छंदस्यपोषकस्तु ॥ वृत्तिसमासः ॥ रसालपा
कारंतार्कश्चेति पाकद्वयं ॥ तत्राद्यस्तस्यापुष्टिकृत् ॥ छंदश्चेद्वस्त्रावसंततिलकारंभोद्दलादिकं ॥ उद्दाम्
विधायपुष्पावचयं चलंत्या मंजीरनादो मदखंजनाख्यो ॥ मदोऽप्यमंदं हरिमंजनाम्नं कुशेजे शयं जागरयां
चकार ॥ पूर्वपूर्वदशायाः परं परं चारुतायां रसालपाकः ॥ सहृदयैकसंवेद्यः ॥ वैपरीत्ये वृंताकपाकः यथा ॥
आलोकनं कुटिलितेन विलोचनेन संभाषणं च वचसा मनसा च मर्द ॥ लीलामयस्य वपुषश्च यश्च प्रकृ
तिस्तवेयं राधे क्रमेण मदनस्य नवा मदस्याः ॥ अत्र तुर्ये पादे पूर्वः ॥ लीलामयस्य वपुषस्तव राधिके
यं कापि क्रमानुसहजः किमु कृत्रिमो वेति पाठभेदे तु परः ॥ अत्र वैदर्भ्यां सत्यामपि निरतानत्पाप
कपाकविरहात् ॥ वैदर्भी गर्जिणीव स्फुरति रसमयी कामसूक्तिमणीवेत्यत्र नयाविधायारक्ता
या स्थितापि वैदर्भी चमत्करोति ॥ तत्पोषकछंदोविरहात् ॥ गौडानुगुणं चेतश्छंदः ॥ गौडीपरु
षवर्णस्याद्दीर्घवृत्तियुतो जसा ॥ रुक्षाक्षरा दीर्घसमासा नैगुणेनौजसा युक्ता ॥ गौडीयथा ॥ तु
रगदनुसुतां गौरीत्यादि ॥ यथा वा ॥ कालियस्य फणरत्नकुट्टिमं कुट्टयन्यदसरोजघट्टनैः ॥ मंगु

काव्यकौ·

१७

लानिवितनोतु लांडवे पंडितस्तवांश्रखंडशेखरः ॥ नूर्ग्यनुप्रासन्नाकृ नापि ॥ अनुप्रासप्राचुर्य्यं गौ
डीस्मर्य ॥ गौडीगाढबंधगूढप्रकटहठघटावर्गगर्जैव गौरीगुणैर्नरानुगुणो व्यनुप्रासः प्राचुर्य्या
गौडीमनुवध्नाति ॥ दंदंदंदंवादयद्दुंदुभीनां नंदद्दंदं व्योम्नि दंदारकाणां ॥ सीधुस्यंदामंदमंदारवर्षैः मकरंदैः
सांद्रानंदं नंदसूनुं ववंदे ॥ पांचालीतु नयात्मिका ॥ गौडीवैदर्भ्योरसाम्ये पांचाली स्यात् ॥ यथा ॥
अयमुदयति मुद्राभंजनः पद्मिनीनामुदयगिरिवनाली बालमंदारपुष्पं ॥ विरहविधुरकोकद्वंद्व डःखितः
बंधुर्विभिंदन् कुपितकपिकपोलक्रोडताम्रस्तमांसि ॥ कथाप्रायार्थी माधुर्य्यप्राचुर्य्यगुणा
पांचालीति केचित् ॥ लाटीतु शिथिलावर्णैर्मृदुभिर्लीढ्निर्युता ॥ यथा ॥ लोललालिमालामि
लितामालतीलता ॥ जलदाकलितेकाले करालेविलयाय मे ॥ लाटानुप्रासः वाकृत्य्यैव या
नुसर्तव्यः ॥ एवमेवाक्रमन्ये ॥ गौडीडंबरबंधास्याद्वैदर्भी ललितक्रमा ॥ पांचाली मिश्रभावेन
लाटीतु मृदुभिः पदैरिति ॥ यद्यपि गुणत्रयादियं गतार्थी तथाप्यत्र विशेषावगतये निरूपिता
॥ इति काव्यकौस्तुभे रीतिनिर्णयः पंचमी प्रभा ॥ अथ दोषानाह ॥ हृदयनिविशद्भिर्यैः श्री
यते काव्यचारुता ॥ दोषास्ते कथिताः प्राज्ञैः पदवाक्यार्थसंश्रयाः ॥ अत्र वाक्यार्थयोरपि रसा

दिग्मोघाः ॥ तत्र पददोषानाह ॥ दुष्टं श्रुतिकटुं व्यर्थं नेयार्थमसमर्थकं ॥ अवाचकं त्रिधाश्लीलं च्युतसं
स्कृतिः ॥ ग्राम्यं स्यादप्रतीतं च विरुद्धमतिकृत्तथा ॥ अविमृष्टविधेयांशं क्लिष्टं च पदमुज्झु
गुः ॥ श्रुतिवद्धादिपदं दुष्टं मुज्झुगुरिति संबंधः ॥ तत्र कष्टाक्षरं श्रुतिकटु ॥ यथा ॥ स्त्रष्टा विनि
र्मितानन्वी ॥ व्यर्थं यथा ॥ मोदमेवि दधाति च ॥ अत्र चेति व्यर्थं ॥ नेयार्थं रूढिफलाभ्यां विनाला
क्षणिकं ॥ यथा ॥ नात्तिगोचर्ई नः पश्य पुष्पवृष्टिः कपिध्वजे ॥ कपिध्वजशब्देनात्रार्जुनस्य ल
क्षाः ॥ असमर्थं यथा ॥ कासारं हन्ति गोविंदः ॥ गत्यादेर्हन्तेः सामर्थ्यं नास्ति ॥ अवाचिकं यथा ॥
मावि धत्तेनुकं यथा ॥ अत्र दृष्टो विधात्रवाचकः ॥ व्रीडाजुगुप्सामंगलावबोधित्वादश्लीलं त्रि
धा ॥ यथा ॥ नगं चेते वज्ञा विमुकुंद भजनेन विट् ॥ सनो स्तनेव च वृष्टस्य पुनर्दृष्टिं गमिष्यति ॥
अत्र नगविट्नष्टशब्दाः क्रमात् व्रीडादिद्योतकाः ॥ व्यर्थसंदिग्धं यथा ॥ प्रयाति पश्चिमे न द्यां घ ४
अत्र नद्यां सरितीति प्रयातीति ॥ द्यामाकाशं न प्रयातीति प्रतीयते ॥ व्याकरणविरुद्धं च्युतसंस्कृ
तिर्यथा ॥ रामा धावंति मानसं ॥ ग्राम्यं यथा ॥ सुकटेः स्मरकंडूतिरस्या वर्द्धत्यहर्निशं ॥ अत्र कं
टिकंडूतिपदं एकशास्त्रख्यातमप्रतीतं यथा ॥ इदं वीचानुमानेन साधितं केन दृश्यतां ॥ केच

काप्रको·

१८

त्वाच्चयस्यानुमानं वीतमुक्तं तेनैयायिकैः॥ विरुद्धमतिकृद्यथा॥ शर्वाणीपतिरेवात्र तुष्यत्याश्रुनिज
श्रितं॥ अत्र शर्वाणीपतिः पत्यंतरधीजननात्तथा॥ अविमृष्टः प्राधान्येनानिर्दिष्टो विधेयांशो य
त्र तत्॥ विधेयांशस्य प्राधान्येनानिर्देशः॥ स खलु समासेनान्यभावाद्भवति॥ तद्यथा॥ ॥
तवतन्विकटाक्षोयं घष्टबाणो मनोमुचः॥ प्रविशप्रहादृयेकृद्यदृष्यादृर्पंचकारयत्॥ अत्र बाण
स्य घष्टत्वं दर्पस्य दृष्टात्वं च विधेयं तच्चथानु प्रतीयते समासेन गुणीभावात्॥ तेन घष्ट इति न
नुदर्प्यमर्थमिति पाठः॥ अवहितार्थप्रतीतिकं क्लिष्टं॥ यथा॥ हरिप्रियापितृवधूधारयात
ल्लितं वचः॥ अत्र हरिप्रियाश्रीतत्पिता समुद्रस्तद्वधूर्गंगा तस्या धारयातुल्यं वाक्यमिति यो
ज्यं॥ अप्रयुक्तमनुचितार्थं च पदमिदयठंति॥ यथा॥ मेमेष्टदेवतो नास्ति सोऽपि हलधरानु
जः॥ अत्र दैवतशब्दः पुंसि न प्रयुज्यते॥ हलधरशब्दः कृषिकारित्वव्यंजनादनुचितार्थः॥ एते के
चन दोषाः पदांशे वाक्ये च संभवलीमृग्याः॥ अथवाक्यदोषानाह॥ प्रतिकूलाक्षरं वाक्यं कुसंधि च
विसंधि च॥ आधिक्यन्यूनकथितपदक्रममगुर्न्निति॥ यतन्प्रकर्षं संकीर्णं तुल्याहतविसर्गकं॥
अनवन्मतयोगं च हतवृत्तं च दोषभाक्॥ प्रतिकूलादिवाक्यदोषभागित्यनुषंगः॥ अत्र प्राति

कृत्ता हारं यथा॥ नंदसूरसनुर मंदश्रीरनंदत्केशिनंदरन अत्र वर्णावीरमन्ति कृत्ताः॥ कुसंधि यथा
पर्टवा याहि रं तर्म्यं॥ विसंधि यथा॥ तन्नेत्रे अंबुजे इमे॥ अधिकपदादीनि स्मात्रीणि यथा॥
यांत्या रविसुता दृष्टो घनाभः श्यामलो युवा॥ करोति सखिभिः केलिं चित्रकेलिपरैः सह॥ द्वि
तीये आने सखिकं कर्तृत्वं किलीति कथितं च॥ अक्रमं यथा॥ राधाकर्णं तनेत्रो सोऽस्य त्वेत्यानं
दितो हरिः॥ अत्रे निष्ठत्वेति स्थिक्रमः॥ वाक्यमध्ये वाक्यप्रवेशात् गर्भितं॥ यथा॥ यास्य त्वेषश
पे तुभ्यं वेरयापाद्दरी वनो॥ अत्र शपे तुभ्यमिति वाक्यं वाक्यांतरप्रविष्टं॥ पतत्प्रकर्षं यथा॥ प्रोद्दंड
भुजदंडो सौ रामो हन्तु रावणं रणे॥ अत्रोत्तरत्रानुप्रासप्रकर्षः पतितः॥ वाक्यांतरपदानां वाक्यां
तरप्रवेशे संकीर्णं॥ यथा॥ चंद्रं मुंच विशालाक्षि मानं पश्य नभोंगणे॥ अत्र नभोंगणे चंद्रं प
श्य मानं मुंच सुभ्रु॥ लुप्तविसर्गं यथा॥ गतानि नाणि इमा बाले॥ आहतविसर्गं यथा॥ नरो धी
रो वरो गतः॥ अत्रोत्वं प्राप्ता विसर्गाः॥ असिद्धदृष्टसंबंधं मनवंमानयोगं यथा॥ जय
श्री मनोजस्य यया विश्वं विजृंभितं॥ यो पभासी विनाशेन तृथा मम कुतो घृणा॥ अत्र
यच्छब्दनिर्दिष्टानां वाक्यानां मिथो नैरपेक्ष्यात्तदंतस्थेन परभासीशब्देन परेषां संबंधो दुर्घ

काव्यकौ· १९

ट:॥ यां विना मीरुधा प्राणाः व प्रासीसन्निपातेसु घटः सः॥ हतवृत्तं यथा॥ इदमुरुहरान्यत
किं नाम्यं नव त्या इसेव नात॥ अत्र हरिणी छंदस्य स्मिन षष्ठे वर्णे यतिरुचिता॥ रसयुगह
येन्सो म्नो स्लो गो पदा हरिणी तद्वेतद्धन्म स्लणात्॥ इत्यत्र परपदसंधानकृता यतिरश्रव्य
त्वेन भजते॥ अर्थार्थदोषनाह॥ अपुष्ट कष्ट संदिग्ध व्याहताश्लील दुष्क्रमा॥ प्रकाशित
विरुद्धान्य सहचार्य नवीकृता॥ साकांक्ष ग्राम्य निर्हेतु पुनरुक्ता स्तथापरे॥ प्रसिद्ध्यादिवि
रुद्धाद्या अर्थदुष्टाः प्रकीर्तिताः॥ अपुष्टादयोऽर्थदुष्टाद्वाः सर्थः॥ अत्रापुष्टो यथा॥ चंद्रो महति
खे भाति लसंति वितता दिशः॥ अत्र महतीति विशेषणं विशेष्यानूतं स्वं न पुष्णाति॥ कष्टो
यथा॥ योगिनो निमज्जोज्ज्वाश्च भवं त्याशयेवेदिनः॥ अत्राशयशब्देन वा समाशब्देन वा ध्यात्वा
त कष्टता॥ संदिग्धो यथा॥ नितंवाम्र्युक्त्वोसेव्याः किं वा सांति न तामिह॥ अत्र शांतश्रृगा
रिणोः को वक्तुस्य निश्चया त्संदेहः॥ व्याहतो यथा॥ सीतेन चंद्रिकारम्या यथा त्वं नेत्रचंद्रि
का॥ अत्र यस्य रामस्य चंद्रिका नाना नंदहेतुः॥ स एव सीतायाश्चंद्रिकात्वमारोपयतीति व्याह
तोऽर्थः॥ अश्लीलो यथा॥ कुर्यांचे यदुर्गं गो यस्मात्क्षणेरति मया चल॥ अत्र प्रवायत्नतीले १९

रतेश्लीलोर्थः ॥ दुष्क्रमो यथा ॥ अश्वं मे देहि राजेंद्र गजं वा मदसंकुलं ॥ अत्र पूर्वं हस्तिन्यर्थिते क्रमः ॥
प्रकाशितविरुद्धो यथा ॥ द्रष्टव्यः स खि देशोसौ वंद्यो यत्र न दुःखदः ॥ अत्र कांतोन्ययत्र लग्नत
इति विरुद्धं प्रकाश्यते ॥ अन्यसहचारी यथा ॥ वायसाः साधवस्तुल्या दृष्टाः स्वपरपुत्रयोः ॥
अत्र वायसानामपकर्षीत सहचरत्वेन ॥ नवीकृतो यथा ॥ सद्राचरति खेभानुः सद्रावहतिमा
रुतः ॥ सद्राधत्ते भुवं शेषः सद्राधीरो विकल्पनः ॥ एकनंगी निर्दिष्टानेकार्थत्वमत्त वीकृतत्वमेते
नो मुह्यति ॥ तत्क्रमादुति तुर्य्यपादे नवीकृतत्वं स्यात् ॥ साकांक्षो यथा ॥ मां जीवयस्व रारोहे ॥
अधारसुधयेत्साकांक्षति ॥ ग्राम्यो यथा ॥ नवभोग्यमत्तनूः ॥ अत्र भ्रमणप्रसयात्मा
म्योर्थः ॥ निर्हेतुर्यथा ॥ नृविशते नृपो निःसंकुमार परिधावति ॥ अत्र प्रसह्य भूशयने हे
पुनरुक्तो यथा ४ तुर्नेक्तिः ॥ रामस्य ~~वल्लभा~~ भार्यासी सीतासौ दृश्यादिति वल्लभा ॥ अत्र वल्लभा पदार्थः पुनरुक्तः
प्रसिद्धिविरुद्धो यथा ॥ शितन्मूलधरो विष्णुश्चचार समरांतरे ॥ अत्र विष्णोश्चक्रधारणं प्रसि
द्धं तेन मूलधारणं विरुद्धं ॥ आदिना विद्याविरुद्धो यथा ॥ करजक्षतगंडेयं विजानाति पतिनास
ह ॥ अत्र गंडे नखक्षतं कामशास्त्रेण विरुद्धं ॥ आदिशब्दात् सनियमापरिवृत्तादयः ॥ यथा ॥

देवत्वममवद्योमि ॥ अत्र त्वमेवेति नियमो वाच्यः ॥ अथ रसदोषानाह ॥ अनियमपरिवृत्तोयथा ॥ चे
तस्येव मत्तमधुरः ॥ अत्र चेतस्येवेति नियमो वाच्यः ॥ अथ रसदोषानाह ॥ रसस्योक्तिः स्वशब्देन स्था
यि संचारिणो तथा ॥ भावस्यागस्तेनैतृणां रसदोषाश्चतुर्दश ॥ क्रमेणोदा॰ मन्नदासरयेश्चैवतः शृं
गारविधुवीक्षणात् ॥ अत्र शृंगारशब्दः ॥ रामैदृष्टा घनश्यामं जानक्या रतिरैधत ॥ अत्र रतिशब्द
लज्जाद्धार कां ले न चुंबिता मदिरेक्षणा ॥ अत्र लज्जाशब्दः ॥ वीररौद्रशृंगार शांत प्रधानाधीरोदा
त्तधीरोद्धतधीरललितधीरशांत स्वाधारानेतारस्तेषां स्वभावान्यथावर्णनं च दोषः ॥ एषां मनु
जाविजाव रुष्टत्वं क्रोधयुग्म दोषाः ॥ लक्ष्याण्यूह्यानि ॥ दोषा नरोणि चोक्ता निपुणनिर्मीः ॥ इ
ति काव्यकौस्तुभे दोषनिर्णयः षष्ठीप्रभा ॥ एवं काव्यस्य गुणरीतिदूषणानि प्रदर्शितानि ॥ अ
थास्योत्तमादिभेदान्निरूपयति ॥ तत्र रसादिव्यंग्यः काव्यस्यात्मावस्त्वादिकस्यात्मावस्त्वादि
व्यंग्यस्तु तस्य प्राणः इति यत्प्रागुक्तं तत्प्रदर्शयितुमुत्तमकाव्यभेदान्निरूपयति ॥ तत्र रसादिव्यं
ग्यस्तु तस्य प्राणः इति यत्प्रागुक्तं तत्प्रदर्शितयितुमुत्तमकाव्यभेदान्प्रवर्त्तयति ॥ वाच्यातिचारु
णि व्यंग्ये तत्काव्यं प्रोक्तमुत्तमं ॥ वाच्यं व्यंग्येन चमत्कारिणि सति तत्सर्वोत्कृष्टं काव्यमुत्तमं ॥ ध्वनिरू

१ स्यात्तथा मंग्योरसादिकः ध्वन्यतेस्मिन्नतेनेनवेति व्युत्पत्त्या तदुत्तमं काव्यं ध्वनिरुक्तं ।

रुत्तमकाव्यं ध्वनिरुक्तः ॥ ध्वन्यते स्मादिति व्युत्पत्त्या तु रसादिर्व्यंग्योपि ध्वनिः ॥ ध्वनेरुत्तमकाव्यस्य द्वौ भेदा
विह विख्यातौ ॥ एकस्याद्भिधामूलो लक्षणामूलकोपरः ॥ आद्यस्तु वाध्यः वाच्यः स्याद्वाध्यवाच्यप
रस्कृतः ॥ आद्योऽभिधामूलो ध्वनिर्वाध्यावाच्योऽयत्र तादृशः स्यात् ॥ अत्र वाच्यं अर्थं स्वप्रकाश
यत्वेन व्यंग्यं प्रकाशयति घटादिमिव दीपः ॥ परस्तु लक्षणामूलः स तु वाध्यः वाच्यः ॥ ध्वनेरवा
ध्यवाच्यस्य नवेद्भेदद्वयं पुनः ॥ असंलक्ष्यक्रमो व्यंग्यो लक्ष्यव्यंग्यक्रमस्तथा ॥ अभिधामूलध्वनि
द्विविंधः ॥ एकोऽसंलक्ष्यक्रमव्यंग्यः परस्तु लक्ष्यव्यंग्यक्रम इति ॥ तयोराद्यमिदं दर्शयति ॥ अर्थोपि
त्रनवेद्यंग्यो रसभावादिरक्रमः ॥ असंलक्ष्यक्रमव्यंग्यो ध्वनिः सविंगद्यते ॥ क्रमस्वरू नि ७
पोऽसंलक्ष्यक्रमो रसादिरर्थो यत्र व्यंग्यो न वेत्स ध्वनिरसंलक्ष्यक्रमव्यंग्यः स्यात् ॥ व्यंग्यप्रती
तेर्विभावादिहेतुकत्वाद्यद्यपि क्रमस्तथाप्यसादुत्पलपत्रशतवेधवन्न संलक्ष्यते ॥ लाघवाद्
तोऽसंलक्ष्यक्रमः स उदा ॥ तं मुग्धादीसादीनि ॥ पदवाक्यप्रबंधेषु पद्यांश रचनासु च ॥ वर्णेषु
च न ज संसेप मु व्यक्तं तं रस ध्वनिः ॥ अर्थोत्तिमं दर्शयति ॥ व्यंग्ये शब्दादि शक्त्युत्थे सम सनुस्वान
संन्निभे ॥ शब्दार्थोभयशक्त्युत्थो लक्ष्यव्यंग्यक्रमो ध्वनिः ॥ घंटादौ हन्यमाने मुख्य शब्दानंत

काव्यको॰ रं यथान्यः सूक्ष्मः शब्दो ध्वनिनामानुदेति तद्व्यंग्यश्चेतत्क्रमलक्ष्यः स्याच्चेदि ध्वनिर्लक्ष्यक्रमव्यंग्यः स
२१ क्रमाद्योतनं चेत् ॥ अन्यस्य शब्दार्थोभयशक्त्युत्थत्वात्स ध्वनिस्त्रिभेदः ॥ शब्दशक्तिमूलोऽर्थशक्ति
मूल उभयशक्तिमूलश्चेति ॥ तेषु प्रथममाह ॥ वस्त्वलंकृतिरूपत्वाद्व्यंग्यस्याद्यो द्विधा मतः ॥ यत्र शब्दादे
व वस्त्वालंकारो वा व्यंग्यौ स्यातां स शब्दशक्तिमूलो द्विभेदः ॥ क्रमेणोदा॰ ॥ पुष्पमार्गणमनोरथोद्
तेत्यादि ॥ अत्र तामिति सुंदरं पश्यंसंदहस्मरेणपीडितायया ॥ प्रसन्नेचिन्तास्यां तथाविधोहि
तिवस्तु शब्दादेव नासते ॥ कान्तानिर्निन्दइत्यादि ॥ अत्रोपमालंकारः शब्दादेव ॥ अथ द्विती
यः ॥ वस्त्वलंकृतिरूपोऽर्थो व्यंजकः सम्भवी स्वतः ॥ वक्रप्रौढोक्तिमात्राद्वा सिद्धस्तेन चतुर्विधः ॥
एकैकोवस्त्वलंकारौ स यस्माद्व्यंजयत्येत ॥ तद्योगी ध्वनिरेषस्यादर्थशक्त्युद्भवोऽष्टधा ॥ अर्थ
शक्तिभव ध्वनिरष्टविधः ॥ तथाहि ॥ अर्थोपि ध्यानो व्यंजकः स च स्वतः संभवालोकेपिदृष्टः ॥
तस्मिन्नदृष्टेपि वक्तुः प्रतिभामात्रात् सिद्धश्चेति ॥ द्विविधोपि वस्त्वलंकाररूपत्वाच्चतुर्विधः ॥
सन्नेकैको वस्त्वलंकारौ यद्व्यंजयत्येतस्य व्यंजको ध्वनिरष्टविधः ॥ क्रमेणोदा॰ ॥ कोपधाः कु
वलेवध्वादुःशासनदुश्चेष्टितामृद पियःकुरुसंसदि गुरुपुरुतोररज्ञल्लज्जोसमनोहरिःपाया

तु ॥ अत्र निजतनुकलाघवं तिलमात्रमपि हरिर्न सहतीति वस्तुना व्यंग्यं ज्ञातं ॥ समस्तसमस्तालिनिज
स्यंदेशं रूपानयो यकुरुदं विनेदं ॥ वक्काले काः कांते मुखावगूढाशोनांतवामीकुलयेति कांचि
त् ॥ अत्र विपरीतरतिमाचरंत्या स्तनवस्त्रं दकुंतलालल्लाटलग्नाः संतः पुष्पार्थविंदप्रसक्ता गं
गा इव नाव भास्यंतीति वस्तुना व ॥ गंजनान्नहि विनेपि गुरुदक्षणं खंजनासियमुना मधुनागा ॥
अंजनानदं दकुंजरएकः कंजनालदलगंजनकारी ॥ अत्र ध्वनेत्यकांडे पियदृगास्तेन स्नानं तं ना
गाः ॥ किंतु कृष्णांगसंगायैवेति काव्यलिंगालंकारस्तेन त्वं गुरुणं गंजना गुरुगंजनात न्मबिभेषी
ति तस्मान्नवनमयमपि तु तत्संगविरहादेवेति वस्तु ॥ एवं कुंजरइति कृष्णाख्यापकवादुपकृति रलं
कारस्तेन कृष्णकुंजरयो रूपमा चेति ॥ एषु चतुर्विधोर्थः स्वतः संभवी ॥ चलंतिचरणालीति निना
वध्याया दिना वतः ॥ पतंति पृथुलालसर्हिंसो दृयमिलविंदवः ॥ अत्र स्वानाविकासद्दादि स्यंदना
दवं माधुर्यवृष्टिरलोलोकानरम्यमिति वस्तुना रासलास्यविधौ वाकीदृकुतवृष्टिरिति वस्तु ॥ नि
जं मुखमनाच्छाद्यनीलाकमलकोरकं ॥ राधे किमुकरांगुल्या विकाशयितुमीहसे ॥ अत्र व
स्तुना रूपकं ॥ गाढमालिंगितुं कांते पर्यंतमुपसर्पति निर्याति हृदयान्मानस्तन्व्यापीडनतो

रिवु॥ अत्रोत्प्रेक्षया प्रस्तालिंगनादिदानं वस्तु॥ किं वर्ण्यते नवगोविंद सेयं शारदचंद्रिका॥ यत्की
र्त्तिर्गामिनी भालकस्तूरीतिलकायते॥ अत्र लक्ष्मीर्त्तोसि सा किमर्थमियं कौमुदीति प्रतीयमु
पमया॥ एषु व्यंजकार्थः स्फुटः प्रतिभया निर्मितः॥ तदेवमष्टधा॥ एक एव द्विशक्त्युत्थः॥ व्यंग
भुत्थे सति ध्वनेरेक एव भेदः॥ यथा॥ निःशेषतापसंहर्त्तजिगमीवनदायकः॥ मुदिरो मुरवैरीव
नमते कस्य वल्लभः॥ अत्र शब्दार्थयोः शक्त्या घनकृष्णयोरुपमा व्यज्यते॥ तदेवं सप्तदशात्मकः
तदेवमभिधामूलो ध्वनिर्दशविधः प्रोक्तः विवक्षितान्यपरवाच्योयमुच्यते॥ अथ लक्षणा
मूलो दर्श्यते॥ अर्थान्तरोपसंक्रांतः सर्वथा च तिरस्कृतः॥ वाच्यः स्याद्यध्ववाच्यस्य तेनासौ द्वि
विधः स्मृतः॥ यथ्यवाच्यो ध्वनिर्द्विविधः॥ अर्थान्तरोपसंक्रांतवाच्योत्यंततिरस्कृतवाच्यश्चेति॥
यत्र वाच्योर्थः स्वयमनुपयुक्तः स्वविशेषरूपेर्थान्तरे परिणमते स प्रथमः॥ यत्र स्वस्यात्यंतानुपप
न्नः सन् स्वविपरीतेनार्थान्तरेण परिणमते स द्वितीयः॥ क्रमेणोदा०॥ तस्यैव वाणी वाणी स्या
त्कृतंयः परिकीर्त्तयेत्॥ अत्र द्वितीयवाणीशब्दः पुनरुक्तभिया साधारणवाणीरूपेर्थे वाधि
तः॥ सरसा फल्यादिगुणविशिष्टवाणीरूपमर्थं बोधयति॥ व्रजपति मति सुंदरागमीत्यादि

अत्र नगवद्दर्शननिषेधरूपो वाच्यार्थोऽनुपपन्नः ॥ सन्नत्वविपरीततद्विधिरूपतया पर्य्यवस्यती
ति द्विधा वाच्यवाच्यः ॥ अयमविवक्षितवाच्यः कथ्यते । अदसंकरम् सृष्टिक्रमेण ॥ जहार हारिण
सीयं कुंदेंदुमधुरैः स्मितैः ॥ कुंडलोज्वलगंडश्री हृदयं विदयं मम ॥ कुमारकचभारस्तसारः संप्र
ति चेतसि ॥ विलग्नशरवन्मग्नो लग्नोऽप्येत किमद्भुतं ॥ शब्दसाम्यं च सप्रोक्तो भेदेनार्थमात्रतः ॥
शब्दानां शब्दस्य वा साम्यं लाटानुप्रासः ॥ शब्दार्थयोरभेदेऽपि तात्पर्यमात्रात् । भेदे सती नियमकाङ्क्षे
दः ॥ क्रमेणोदाहरणः ॥ अर्चितो येन गोविंदस्तस्य तीर्थाटनेन किं ॥ अर्चितो येन गोविंदस्तस्य तीर्थाटने
न किं ॥ अत्र नगवद्विमुखस्य किं तीर्थाटनेनापि न किंचित्फलं तत्संमुखस्य तु तेन विनापि त
त्फलमस्तीति तात्पर्य्यं निधते ॥ तारुण्यात्परसि ते पुंसि तरुणीवत शर्करा ॥ शर्करा क्न तु माधु
र्य्यमीदृशं न जते नरां ॥ इह प्रथमं शर्करापदं विधेयपरं द्वितीयं त्वनुवादपरं ॥ भिन्नार्थासि संभव
त्यर्थे ॥ स्वरव्यंजनसंहतिः ॥ क्रमेण तेन च च्छेदा वृत्तिर्यमकं स्मृतं ॥ यद्यर्थत्वे भवेत्तदाऽपो वर्णसं
घो भिन्नार्थको ॥ यदि न संभवेत्तदा ज्ञावपि व्यर्थौ ॥ एकतरार्थवत्वे तु सार्थान्यार्थौ चेति भूरिभेदं य
मकं ॥ उदा० ॥ सुरसार्थनमूषितपदे ॥ अस्मादिनिरुधिकनक्किसंनमेः ॥ सुरसार्थनमूषितपदेस्त

वैः स्तुतः केशिहा जयति ॥ अत्र द्वौ सार्थौ ॥ कुसुमराजिविराजिविभूषणेत्यादौ तु द्वावपि व्यर्थौ
॥ आयाताशरदादौ शरदादौ मान्मथः प्रखरः ॥ सरति सरः कलहंसी कलहंसीमंतिनीत्य
जति ॥ अत्र सार्थौचि सार्थव्यर्थौ चेति ॥ भेदाद्बहुविधोप्ययं ॥ पदवाक्यप्रबंधादिगतत्वेनापि
ताहृशः ॥ तदेवमसंलक्ष्यक्रमव्यंग्यस्य ध्वनेर्निरूपणेन काव्यात्मा रसादिव्यंग्यो दर्शितः ॥ ल
क्ष्यक्रमव्यंग्यक्रमादेर्ध्वनेर्निरूपणेन तु काव्यप्राणवस्त्वादिव्यंग्यो निर्दिष्टः ॥ इति काव्यकौस्तुभे ध्व
निभेदनिर्णयः सप्तमीप्रभा ॥ ७ ॥ अथ मध्यमकाव्यमाह ॥ वाच्यादचमत्कारिणि काव्यं मध्यमुदी
र्यते व्यंग्ये ॥ व्यंग्ये वाच्यादचारुणि सति तस्यैवोक्तं काव्यं मध्यममुच्यते ॥ तच्चासुंदरमस्फुटमगूढ
मितरांगवाच्यसिद्ध्यंगं ॥ तत्र व्यंग्यं तत्रासुंदरं यथा ॥ आगतो निशि मदीयमंदिरं कुंददंति कि
ल कोपि तस्करः ॥ निद्रिया नान्यपजरलाश्च सुखी श्रयन्ममसनीलकांतिभिः ॥ अत्र कृष्णानुरा
गादनिद्रा इति व्यंग्यं तच्च वाच्यापेक्षया न चारु ॥ अस्फुटं यथा ॥ दृष्टः सवीडमतो विंदधत्तच
कुलं कुलहन्तात ॥ परिष्कुर्वंति गात्राणि वासोलंकारचंदनैः ॥ अत्र नगरबकेण निहितावीरावल
यानःस्फुरंति नानूवरीनुंनाः स्वगात्राणि मंडयंतीति व्यंग्यमस्फुटं ॥ अगूढं यथा ॥ उत्कीर्णनी

स्यादि ॥ अत्र पिबंतीति सादरावलोको लक्ष्यस्तस्य गूढासक्तिं व्यंग्या सा च वाच्यवत्प्रकाशादगू
ढेव ॥ इतरांगं यथा ॥ कांतस्याश्रवो ते स्वनने स्तु दीर्घ्यपादांगुली यानि पदांगुलीषु ॥ समर्पयंतीसु
मुखी वयस्यां लीलांबुजेन प्रजहार तन्वी ॥ अत्र हास्यस्य श्रृंगारांगं ॥ वाच्यसिद्ध्यंगं ॥ यथा ॥ नी
चीदाच्युत गच्छामि किमत्र तव वीक्षया ॥ इत्यामंत्रणे भावज्ञः स स्वजे युवतिं हरिः ॥ अत्राच्युतेत्या
दिपदं स्वंगर्पमात्रेणे स्यादिवाच्यसिद्धेरंगं तद्वयपादकलात् ॥ एवमन्येपि भेदा वोध्याः ॥ इति काव्य
कौस्तुभे मध्यमकाव्यनिर्णयो ष्टमी प्रभा ॥ अथ कनिष्ठकाव्यमाह ॥ अव्यंग्यं तु कनिष्ठं स्यात् काव्यं श
ब्दार्थचित्रितं ॥ स्फुटव्यंग्यरहितं काव्यं कनिष्ठं ॥ तच्च शब्दालंकारयोगाच्छब्दचित्रं ॥ अर्थालंका
रयोगादर्थचित्रमिति द्विविधं ॥ अथालंकाराणां लक्षणं ॥ शब्दार्थवर्त्तिनः संतं रसमुत्कर्ष वर्द्धयंति ५
यंति ये ॥ तेलंकारा यथात्मानं देहस्थाः कंकणादयः ॥ यथा कुंडलादयः शरीरशोभातिशायि
नः शारीरिणमुपकुर्वंति तथानुप्रासोपमादयः ॥ शब्दार्थशोभातिशायिनः संभविनं रसमुप उत्कर्षकाः २
कुर्वंतीत्यलंकारास्ते ॥ तेषु शब्दालंकारानाह ॥ वर्णसाम्यमनुप्रासः पूर्वसंस्कारबोधकृत् ॥ असं
युक्तसंयुक्तरूपस्यानेकस्य व्यंजनस्य सकृत्साम्यं छेकानुप्रासः ॥ एकस्यासंयुक्तसंयुक्तरूप
स्यैको विदग्धः ।

लाडे ऽविदग्धः

काव्यको० स्यानेकस्य स्वव्यंजनस्यासकृत्साम्यं वृत्त्यनुप्रासः॥ क्रमेणोदा०॥ जहार हरिणाक्षीयं कुंदं दुमधु
२४ रैः स्मितैः॥ कुंडलोज्वलगंडश्रीहृदयं विदयं मम॥ कुमारकवचनेनारस्तसारः संप्रति चेता
सि॥ विजगनशारदवन्मग्नोल्लग्नोप्यनलिकिमकुलं॥ शब्दसाम्यं च सप्रकोभेदे तात्पर्यमात्रतः
शब्दानां शब्दस्य वा साम्यं लाटानुप्रासः॥ शब्दार्थयोरभेदेपि तात्पर्यमात्रात् भेदे सती मम
काद्भद॥ क्रमेणोदा०॥ नार्चितो येन गोविंदस्तस्य तीर्थाटनेन किं॥ अर्चितो येन गोविंदस्तस्य ती
र्थाटनेन किं॥ अत्र भगवद्विमुखस्य तीर्थाटनादपि न किंचित्फलं तत्संमुखस्य तु तेन विना
पि तत्फलमस्तीति तात्पर्यभिधत्ते॥ तारुण्याम्भसि ते पुंसि तरुणी वनशर्करा॥ शर्कराक्ष
नुमाधुर्य्यमीदृशं न जनेतरां॥ इह प्रथमं शर्करापदं विधेयपरं द्वितीयं त्वनुवादपरं॥ भि
न्नार्थासंज्ञव स्यार्थे स्वरव्यंजनसंहतिः॥ क्रमेण तेनैव छेदावृत्तिं यमकं तथा॥ यद्यर्थः सं
भवेत्तदा द्वावर्णसंघौ भिन्नार्थकौ॥ यदि न संभवेत्तदा द्वावपि व्यर्थौ॥ एकतरार्थवत्वे तु सा
र्थव्यर्थौ चेति त्रिविधं यमकं॥ उदा० सुरसार्थभूषितपदे अर्जलीढिभिरधिकभक्तिसंनम्रैः
सुरसार्थभूषितपदैः स्तवः स्तुतः केशिदाजयति॥ अत्र द्वौ सार्थौ॥ कुसुमराजिविराजि

विरूपकेणत्याद्योतु द्वावपि तुल्यार्थौ ॥ आपाताशारदाद्दोशारदाद्दोमान्मथः प्रखरः ॥ सरति सरः कल
हंसीकलहंसीमंतिनी त्यजति ॥ अत्र सार्थेपि सार्थमिथ्यार्थौ चेति ॥ योन रूप्यापवनसंभेदार्थस्या
ततोनवेत् ॥ पुनरुक्तवदाभासस्तदास्याद्भिन्नशब्दगः ॥ विभिन्नाकारसभंगाभंगशब्दनिष्ठः
उदा० ॥ अवलास्त्रीरिपुः कृष्णाद्युधात्सोम्यान्नशंकते ॥ ३ ॥ श्लेषोयदिपदैः श्लिष्टैरनेकार्थो
भिधीयते ॥ वर्णादिश्लेषणादेषतदष्टाभावाच्च संभवेत् ॥ यथा ॥ विधौ विरुद्धे हरितः प्रसादं
नोपभुंजते ॥ अत्र विधाविसुकारेकारयोः श्लेषणं ॥ हरितइति विभक्त्योः दयितेत्यसि ममेत्या
त्सीताराघवयोर्वचः ॥ अत्र दयितेति प्रत्यययोः वृद्धिं तेद धते बुद्धिर्विधर्मादायपथाध्वयः ॥ अ
त्रेदधतइति प्रकृत्योर्वचनयोश्च ॥ विधुमोदइति लिंगयोश्च ॥ चमूरुवसतिर्नीतिमधुरेषा
यथाटवी ॥ अत्रचमूर्विति पदयोः ॥ वर्णादिश्लेषणाभावेपि यथा ॥ भूमन्नलितंबसंसर्गा
न्मादिषीमुदिताबभौ ॥ अत्र प्रकरणादिनिरस्तिधानियमनानावाद्यर्थद्वयं वाच्यं ॥ अत्रैको
भिधयावाध्यः परस्तु तत्सदृशयानिरूढलक्षणयेति ॥ एषशब्दश्लेषः सभंगाभंगतया
द्विविधः ॥ प्रागुक्तलक्षणस्यैषवगंतव्यः ॥ नन्वभंगोर्थश्लेषः स्यात् द्वयोस्तत्रश्लेषणात् ॥

काव्यकौ॰ मेवं ॥ अर्थभेदेऽपि शब्दभेदस्वीकारात् ॥ तस्माद्यत्र शब्दपरिवृत्तौ श्लेषत्वं भज्यते स शब्द
श्लेषः ॥ यथा विधाविन्यादिकः यत्र तन्न भज्यते स त्वर्थश्लेषः ॥ हारबंधो यथा ॥ कुरुतरु यथा संताप

२५ णिरुषनोपतापप्रपन्ने भजनिजविजनं लारहारस्फुरंती ॥ स्तनेकनकनगो शातपातप्र हर्त्ता हरिरंबुद

तप्तां तनुमतुलतनुत्वां भावशावल्यवृत्तां ॥ खड्गबंधो यथा ॥ वीणावाली सुंदरीवृंदमुख्या ख्या श्चेति ध्वन्यात्मका

तासद्गिल्लस्वनः कुंजदेवीं वीसा चक्रे माधवं भावसारा रासोद्भासा कापि तं कुञ्जनीवी ॥ क कारहेतुत्वेवर्ण

पाटबंधो यथा यथा ॥ स्मरारिघनाशिभासुरं जरामराणि साद्रनं ॥ मुरारिनाम भावरं परावरा नोचित्रमुच्यते

त्मसाधनं ॥ त्वमो मुक्तिकाश्रगतिश्च ॥ चक्रबंधो यथा ॥ गंधाढ्येऽरुद्रगुरून्मदालिनिवहे हारबंधो यथा ॥

हारप्रभोल्लिसन्तं संपुष्टं तमुपस्कृतां ध्वनियमी वीचीश्रियो रंजकं ॥ सद्यस्तु गितविभ्रमं सु

निम्नते सीतानिलैः सौरभ्यदे देवं नागभुजं समाहर समयेऽतं नोमि कंचिन्मुदे ॥ स्वभ्यक्कविना

पद्मबंधो यथा ॥ मगर्भचक्रं ॥ कल्पवाक्यसदालोककल्लोहारमिलावकः ॥ कवल्पाधाक्कृतान्तकक्रन्तनाम्नी

रवान्तक ॥५॥ वक्रोक्तिः श्लेषकाकुभ्यां मन्यार्थो यदि कल्प्यते ॥ राधे त्वं कुपिता त्वमेव कुपि

ता स्पष्टासि भूमेर्यता माता त्वं जगतां त्वमेव जगतां माता न विज्ञोऽपरः ॥ देवि त्वं परिहासकेलि

श्रीत्र्रतिरोषः क्रमेणोदार

कलहदनं तालमेवत्यसोस्मेरो वक्षवसुंदरी मवनमन् शौरिः श्रियं वः श्रियात्॥ अत्र कुपि
तेति संजोगणेश्लेषणे मालतिलवंगे गले॥ यथा वा नवचीरं जोरु त्रिदशवदनग्लानिर
धुना सने रामः स्थाता नयुधिपुरंतोल्लक्ष्मणेस खः॥ इयं यास्ये सुखे विपिन मधुना वानर
चमूर्लघिष्ट मघ्हासरपरविलोपालयपठ पुनः॥ अतसीकुसुमश्याम शातसीमंतिनी हृ
तं॥ सततसंकृष्णमाल्लोक्य हृदयं न विद्रूयते॥ अत्रैकयानिमेषैर्थप्रयुक्तो नत्रपरयानुवि
धोघटितः॥ भाषाणांश्लेषणं यत्र तद्भाषासमकं मतं॥ एकविधैः शब्दैर्विविधा भाषा यदि
निबध्यते तदा भाषासमकं नाम॥ उदा०॥ मंजुलमणिमंजीरे कलगंभीरविहारसरसीनी
रे॥ विरसासिकेलिकीरे किमालिधीरे च गंधसारसमीरे॥ अत्र संस्कृतप्राकृतसौरसेनी
प्राच्यवंत्यादिभिरेकविधः श्लेषः॥ यथा ततिल्वासरकिंचिद्दत्वा चान्यत्स्मकाश्यते॥ अन्यो
थयित्रलत्याकृष्युतद्दत्वासरं वुधाः॥ यथा॥ कूजंति कोकिलाः साले यौवने फुल्लमंबुजे॥ किंक
रोतु कुरंगाक्षी वदनेन निपीडिता॥ अत्र रसालसाल इति वक्तव्ये साल इति रक्षितः॥ वनइ
त्यत्र यौवन इति यौदत्तः॥ वदनेति मत्स्युतेवक्ष्य॥ यथा वा॥ हरणं चंद्रमुखी रम्या यामिनी नि

र्मिल्लांवरा ॥ करोति कस्य न स्वांते मे कांत मदनोत्तरं ॥ अत्र गच्युते केदृत्ते कामिनीति ॥ अन्या
थेवि स्फुटं यत्र विंद्वादिप्रच्युतावपि ॥ अलीयते विंदुः आकृत्तादि दुःच्युतकादिकं ॥ यथा ॥

सुंदरि विंदुच्युतके तव ने पुण्यं वभूव पुण्येन ॥ शशमुखि वशीकृतानूद्दशी मम यत्वया
त्वरया ॥ अत्र त्वद्धीनामेवं शीति स्फुटमपरोर्थः ॥ मंदैः कल्लापिनामेते पक्षिणांधर
णीरुहाः ॥ विहतैः स्वागतानीव वाणि वाताद्युतन्वते ॥ इह मंदैरिति विसर्गच्युते मंदैः क
लापिनो मिति ॥ एवं वर्णच्युतकादिकमूह्यं ॥ तत्त्वस्य तेयस्फुटं यत्र पदसंधानकौशलात्
स्मृतां यथा ॥
क्रियादि सद्विप्राज्ञैः ॥ क्रियागुप्तादिति स्फुटं ॥ पांडवानां सभामध्ये दुर्योधन समाग
तः ॥ तस्मै गां च सुवर्णं च सर्वाण्याभरणानि च ॥ अत्रादुरिति क्रियागुप्तिः ॥ वटवृक्षो मह
न्नेष मार्गमाहत्य तिष्ठति ॥ तावत्त्वया न गंतव्यं यावन्नान्यत्र गच्छति ॥ देवटा ॥ एष महान्न
ष्ट इति संधिसंबोधनयोः ॥ माधवस्य पुरा प्यासां साध्वीनां व्रजसुभ्रुवां ॥ राजसेव दृनेत्रन्वीना
पिसत्प्रियचेतसां ॥ अत्रेमतिकर्त्तुः साकं सखीभिः रागस्य कानने स्मिन्दिने दिने ॥ उत्कार्ष्यु
त्कायमेरानिराधावामतयावत ॥ अत्राकमिति कर्मणः ॥ इति पंकमग्नस्य स्पर्द्धकासारदुःखिता

ग्रमी ॥ दुर्वारा मानसंदंशा नमिष्यति घनागमे ॥ अत्र दुर्वारेति करणस्य ॥ एवं संप्रदानाद्यूह्याः ॥
१० ॥ एते शब्दालंकाराः ॥ अर्थालंकाराः ॥ उपमालक्ष्म योः साम्यं वाच्यं वाक्यैकगं भवेत्
द्वयोः सादृश्यमुपमा भवेत् ॥ तस्मात् दृश्यं यदि वाच्यमेकवाक्यगतं च स्यात् ॥ रूपकादेः सादृ
श्यं व्यंग्यं ॥ अनन्वये एकस्यैव सादृश्यं ॥ उपमेयोपमायां वाक्यद्वयगतं स्तोकाम्भोरुहे दृश
तो निमज्जति ॥ पूर्णा चेद् उपमेयादि चतुष्कं शाब्दमीरिते ॥ उपमेयं मुखादि उपमानं पद्मादि ॥
साधर्म्यं गुणक्रियारूपं माधुर्यविकाशादि क्वचिद् दृष्टमात्रं रूपं च ॥ तद्वाचकस्तु यथेवादि ॥
एषु चतुर्षु शब्दोपादानेषु पूर्णोपमोच्यते ॥ श्रौती यथादिर्निर्योग्यादि वार्थ्यं च मिना च सा ॥ आ
र्थी समादिर्निर्योगात् तुल्यार्थवति नातथा ॥ यथेवेवार्थवतया यत्र श्रुता एव साधर्म्यं बोध
यंति सा श्रौती ॥ समतुल्यसदृशादितुल्यार्थवति निर्यत्रार्थात् साधर्म्यस्य बोधः सत्वार्थी ॥ द्वि
धा वाक्यसमासे च तद्धिते चेति षोढा ॥ वाक्यगा समासगा तद्धितगा च श्रौती तथार्थी चे
ति षोढा पूर्णोपमा ॥ क्रमेणोदा० ॥ वेचा मतं यथा स्वादु कुंभाविव कुचौ शरद् ॥ गंधर्वचंदनव
न्मोक्षीत वर्किंब दुर्वर्ण्यते ॥ तत्र क्रमेण श्रौतीत्रयं ॥ कुंभाविवेति समासः ॥ चंदनवदिति

काव्यको· यच्छ्वंताद्विवार्थवत्तिः॥ अत्वेनास्यं समं फुल्लं कुंदाभं स्मितमुज्वलं॥ इवयथीसमवत्तस्या
२७ मोदेनोधरपल्लव॥ अत्र क्रमेणार्थी त्रयं॥ वीसमवद्विनितुल्यार्थवति॥ बालाप्रकेशितटी
कामदहरिवपाणिनीसूत्राणां॥ चेतोहृत्तिरिवासौ निरूपमजंघालताविजातिपुरः॥ अत्र
शाब्दमात्रसाम्यश्रौतीयेष्वाधोपमेसुव्यते॥ अथ लुप्ता॥ लुप्ताष्टधोपमेयादेरेकद्वित्र्यग्र
हाद्भवेत॥ उपमेयादीनां चतुर्णांमध्ये एकस्य द्वयोस्त्रयाणां वाचकेऽनुक्ते लुप्तोपमा॥ साच
वाचकलुप्ता धर्मलुप्ता धर्मवाचकलुप्ता वाचकोपमेयलुप्ता उपमानलुप्ता वाचकोपमानलुप्ता
धर्मोपमानलुप्ता धर्मोपमेयवाचकलुप्ता चेत्यष्टधा यथा॥ अग्निस्पामोऽब्जतुल्यास्या विधूयमनु
हृदयमम॥ दृष्टः कृशांतरेकृष्णो नेक्षाना कल्पपादपो॥ अत्राग्निस्पाम इति वाचकस्यैव शब्दस्यै
लोपः॥ अब्जतुल्यास्य इति धर्मलोपः॥ कल्पपादपन्निति धर्मवाचकलोपः॥ विधूयन्निति वा
चकोपमेयलोपः॥ आत्मानं विधूमिवाचरन्नित्यात्मनउपमेयस्य सद्वोपमावाचकेन लोपात॥
सूतपादाम्बयां समं कापि मनोज्ञं नैव वीक्षते॥ एषचित्तहरः कृष्णोनाप्येनैवोपलभ्यते॥ पूर्वाद्धेतिच

मानस्यलोपः परार्द्धेतुवाचकोपमानयोः॥ नास्तियत्सदृशंक्वापिनापितुल्यंयदाखया॥ हरि
णीनयनाराधालमाधावतिकेशकं॥ अत्रपूर्वार्द्धेधर्मोपमानयोर्लोपः॥ परार्द्धेतुधर्मोपमेय
वाचकानां॥ हरिण्यानयनेइवमनोज्ञेनयनेयस्याः सेति॥ मालोपमायदेकस्योपमानंबहुरि
वीक्ष्यतेयथा॥ कुमुद्वतीवशीतांशोः केतकीवमनोभुवः॥ नलिनीवरवेरासीन्मनोज्ञाराधि
काहरेः॥ यथोर्द्ध्वमुपमेयस्योपमानत्वप्रकल्पनं॥ यत्रस्याच्चारसानिज्ञावदंतिरसनोपमां॥
यथा॥ चंद्रायतेशुक्लरुचापिहंसोहंसायतेचारुगतेनकांता॥ कांतायतेस्पर्शसुखेनवारि
वारीयतेस्वच्छतयाविहायः॥१॥ एकस्यैवोपमेयस्योपमानत्वमनन्वयः एकवाक्यगसमिति
शेषः॥ यथा॥ सिंधुःसिंधुरिवज्यायानिंदुरिंदुरिवोज्वलः॥२॥ पर्यायेणद्वयोस्तच्चेदुपमेयो
पमाश्रुते॥ तदुपमेयत्वमुपमानत्वंचयद्द्वयोः क्रमेणस्याद्वाक्याभ्यांतदोपमेयोपमा॥
यथा॥ श्रीरिवश्रीशवाणीनेवाणीवश्रीर्मनोरमा॥३॥ प्रतिवस्तूपमेकस्मिन्साधर्म्येवाक्य
योःस्थिते॥ यथा॥ राधयामाधवोभातिमाधवेनैवराधिका॥ रजन्याराजतेचंद्रश्चंद्रेणहर

जऽन्त्यपि ॥ अत्रोपमेयत्रदीप्तिरूपो धर्मः शशाङ्कादिनोपात्तः वैधर्म्येण चेयं दृश्यते ॥ चकोर्य्य एव च
तुराश्चंद्रिकाचामकर्मणि ॥ विनावंतीर्न निपुणाः सुदृशो रतनर्मणि ॥ मालारूपा यथा ॥ विम
लएव रविर्विशदः शशी प्रकृतिशोभन एव हि दर्पणः ॥ शिवगिरिः शिवहाससहोदरः सहजसुं
दर एव हि सज्जनः ॥ ५ ॥ दृष्टांतो यत्र सधर्मस्य वस्तुनः प्रतिबिंबनं ॥ सधर्मस्येति इवतो भेदः
यथा ॥ जनः कृष्णपदध्यायी विषयान्नोपजिघ्रति ॥ माकंदमुकुलास्वादी निंबकान्नात्तिको
किलः ॥ वैधर्म्येण यथा ॥ त्वयि दृष्टे कुरंगाक्ष्याः स्त्रंसते मदनव्यथा ॥ दृष्टानुदयभाजींदो ग्ला
निः कुमुदसंहते ॥ प्रतिवस्तूपमायामेकस्य साधर्म्यस्य द्विरुक्तिः ॥ दृष्टांतेन सर्वेषां धर्माणां
प्रतिबिंबवद्भवनं ॥ अर्थांतरन्यासे तु समर्थ्यसमर्थकवाक्ययोः सामान्यविशेषभावद्
त्वेषामसांकर्य्यं ॥ बोध्यः सोऽर्थांतरन्यासो यत्र सामान्यविशेषयोः ॥ हेतुहेतुमतोश्चापि तद्
न्येन समर्थनं ॥ सामान्यस्य विशेषेण समर्थनं ॥ विशेषस्य च सामान्येन हेतोर्हेतुमता समर्थ
नं हेतुमतश्च हेतुनेति चेति चतुर्विधोऽर्थांतरन्यासः ॥ समर्थनस्य साधर्म्यवैधर्म्याभ्यां दृष्टत्वा

दृष्टविधतां व्रजति ॥ क्रमेणोदा० ॥ बृहत्सहायः कार्यान्तं क्षोदीयानपि गच्छति ॥ संभूयांभोधिम
भ्येति महानद्या नगापगा ॥ अत्र विशेषेण सामान्यस्य समर्थनं ॥ चिंतयन्नागतः कृष्णं गां दि
नीनं दृनो यथा ॥ तथैव सत्कुले स्तेन सफलादि सतां कृतिः ॥ अत्र सामान्येन विशेषस्य ॥ सह
सा विदधीत न क्रियामविवेकः परमापदां पदं ॥ वृणते हि विमृश्यकारिणं गुणलुब्धाः स्वयमे
व संपदः ॥ अत्र संपत्करणेन कार्य्येण सहसाविधानाभावस्य विमृश्यकारित्वरूपस्य हेतोः
समर्थनं ॥ पृथ्वि स्थिरा भव भुजंगम धारयैनां त्वं कूर्मराज तदिदं द्वितयं दधीथाः ॥ दिक्कुंजराः
कुरुत तत्त्रितये दिधीर्षां रामः करोति हरकार्मुकमाततज्यम् ॥ अत्र हरकार्मुकाततसज्जीकरणे
न हेतुना पृथ्व्यादिस्थैर्यादेः कार्य्यस्य समर्थनं एतानि साधर्म्योदाहरणानि ॥ वैधर्म्ये यथा ॥ हरि
विमुखस्य ममैते प्राणानि यांतु गांदिनेयस्य तत्पदपंकजमधुना येषु जीवंतु ते ध्रुवं जगति
॥ अत्र सा[illegible]मान्येन विशेषस्य समर्थनं गुणनामेव दौरात्म्याद्धुरि धुर्य्यो नियुज्यते ॥ असं
जातकिणस्कंधः सुखं स्वपिति गौर्गडिः ॥ अत्र विशेषेण सामान्यस्य एवमन्यदूह्यं ॥ ६ ॥ उप

काव्यको मेयस्योपमानाद्याधिक्यं निबध्यते ॥ व्यतिरेकस्तदा बोध्यो व्यत्ययादप्यसौ भवेत् ॥ कश्चिदुप
२८ मानादुपमेयस्याधिक्यं कश्चित्तूपमेयादुपमानस्य तत् ॥ क्रमेणोदा० ॥ पल्लविनः कल्पतरो
रेष विशेषः करस्य ते वीर ॥ भूषयति कर्णमेकः परस्तु कर्णान्तिरस्कुरुते ॥ एकस्त्वं नवपल्लवि
रहमपि स्नाघ्ये प्रियाया गुणैस्त्वामायांति शिलीमुखाः स्मरधनुर्मुक्ताः सखे मामपि ॥ कांता
पादतलाहतिस्तव मुदे तद्वन्ममाप्यावयोः सर्वं तुल्यमशोक केवलमहं धात्रा सशोकः कृतः ल
स्तेषविच्छित्तिकोयं व्यतिरेकः ॥ उत्तरो यथा ॥ तच्चतुलैर्गाधाः संति नकोधा मुनिस्त्रियोस्यह
विशेषस्य ५ रेः ॥ आधारः खलु राधा नियतनमसो धारणप्रेम्णः ॥ १ ॥ अप्रस्तुतप्रशंसा तु सा च तत्प्रस्तुतमा
क्षिपेत् ॥ अप्राकरणिकस्य प्रस्तावश्चेत् प्राकरणिकमाक्षिपति ॥ तदाप्रस्तुतप्रशंसालंकारः
तद्भेदानाह ॥ कार्यकारणसामान्यविशेषसदृशेषु हि ॥ स्यादप्रस्तुतेऽभिहिते हेतोः सदृशस्य च शं
सनं ॥ तदेवं पंचधा ॥ क्रमेणोदा० ॥ आश्लिष्यकंगतः कांतो न जाने सखि संप्रति ॥ अत्र दुःखि
ता किमित्युपलक्ष्यसे ॥ इति कार्ये प्रस्तुते तद्धेतोः कांतविच्छेदस्य प्रस्तावः ॥ १ ॥ यासैस्त मूर्धि

कुर्वंति वेशान्तरकुरंगजांगना:॥ अत्र कुरंगांतिकागमने हेतौ प्रस्तुते तत्कार्यस्य वेशरचनस्य॥२॥
ग्रहनां कुरुतां हेतु रामनामानि कीर्त्तय॥ अत्राऽविद्याविश्वनाशकतया। नक्कि सामान्ये प्र
स्तुते नामकीर्त्तनस्य नक्कि विशेषस्य॥३॥ प्रसादाद्ववनितानाथ कमनीयानि यत्नतः॥ अत्र
स्वसखीहृद्यविशेषे प्रस्तुते नायिकासामान्यस्य॥४॥ कनकांचितमूलोयं तमालः किल दीप्यति
अत्र पीतवाससि कृष्णे प्रस्तुते तत्तुल्यस्य स्विलनिवद्धमूलस्य तमालस्येति पंचधा॥५॥ ८॥ प्र
स्तुतात्प्रस्तुते व्यक्ते कथ्यते प्रस्तुतांकुरः॥ यत्र प्रस्तुतेन वर्ण्यमानेनान्यदभिमतं प्रस्तुतमभ्य
तेस प्रस्तुतांकुरो नाम तद्वा॥ काशावकाशमपि यं दधाति नलिनी कादंबचंचुक्षतं धत्ते चूततलतान्
वं किशलयं पुंस्कोकिलास्वादितं॥ इत्याकर्ण्य मिथः सखीजनवचः सा दीर्घिकायास्तटे चेलां
तेन तिरोदधे स्तनतटं विंबाधरं पाणिना॥ अत्र वाक्यार्थः प्रस्तुतः इयमिति नलिनीव्यक्तिवि
क्तिविशेषनिर्देशात् दीर्घिकायास्तट इत्युक्तत्वात् विशेषः किंचिद्द्वारं नालं कार्यं यदुष्करं न
वेत्॥ आधेयं यदनाधारं यच्चैकं बहुवृत्तिमत्॥ एकं कार्यं कुर्वतो यदि तेनैव व्यापारेण दुः

शक्रमन्यत्कार्यं सिध्येत् यदि प्रसिद्धमाधारं विनैवाधेयं तिष्ठेत् यदि चैकमेकरूप्येण युग
पदनेकत्र वृत्तिमत्स्यात्तदा त्रिविधो विशेषः॥ क्रमेणोदा॰॥ विधिना विदधे राधा सारमादा
 य सर्वतः॥ विधुत्वं नारविंदादि नच्छेशेणैव निर्ममि॥ परलोकगतस्यापि यस्य कुंदेंदुसुंदरं
 जगद्व्याप्यं यशो भाति स जीवति न संशयः॥ अस्ति सा पुरतः पृष्ठे पार्श्वे वा चिंमनस्यपि॥
कामः केनाध्वनो मर्म प्रविश्य प्रतुदत्स्ययम्॥१०॥ विषमः स स्मृतो यास्याद्घटनाननुरूप
योः॥ इष्टार्थोद्योगतो यत्तु स्यादनिष्टस्यैव लंभनं॥ कार्यस्य च विरूपं स्याद्वैरूप्याद्गुणकर्म
णोः॥ क्रमेणोदा॰॥ क्व वज्रसारश्चाणूरः क्व फुल्लः कुसुमप्रभः॥ अत्रातिकर्कशत्वेनातिमृ
दुत्वेन च विरूपयोश्चाणूरकृष्णयोर्घटना॥ अयं दुग्धसिंधोः पतिर्गोकुलेशो हरिर्भूरिदु
ग्धप्रदातेति लोभात्त भजंतोन्वहं तेन तुष्टाविता माः स्वकान्मानदुग्धाद्वयं वारिताः स्मः॥ त
मालश्यामलोप्येष तेनासिरसुरांतकः॥ आसज्य परसेनायां तनोति विशदं यशः॥ अत्रश्या
मरूपं कारणगुणस्तद्वैरूप्यं शोक्लं कार्यजातः॥ सविमनोजस्तनेत्रेणानंददायिना॥

तापं तं नातिरूक्षस्य तन्विचित्रमिदं महत् ॥ अत्र कारणनिष्ठा क्रियानंदः तयारूपातापक्रि
या कार्ये ॥ ११ ॥ तद्गुणः स्वगुणं हित्वा यदन्यगुणमाश्रयेत् ॥ यथा ॥ अधरांजनयोः कां
त्यासु तनो रूपरंजिताः ॥ पश्य गुंजाफलायंते मुक्ता नासावलंबिताः ॥ १२ ॥ संगतान्यगु
णानंगीकारस्तु स्यादतद्गुणः ॥ यथा ॥ क्षीराब्धेरुदराज्जातः कालकूटस्य सोदरः ॥ तथापि
रक्त एवैकः कौस्तुभो न सितासितः ॥ १३ ॥ पूर्वख्यातगुणोत्कर्षानुगुणः कारणांतरैः ॥ यथा
मर्कटो मदिरामत्तो वृश्चिकेनापि दंशितः ॥ ग्रस्तश्चेत्पिशाचेन कुरुते गुरु चापलं ॥ अत्र स्वा
भाविकस्य कपिचापलस्य मद्यादिभिरुत्कर्षः ॥ १४ प्रत्यनीकं बलिष्ठस्य रिपोः पक्षे पराक्रमः
यथा ॥ मध्येन तनु मध्या मे मध्यं जितवती स्वयं ॥ इभकुंभौ भिनत्त्यस्याः कुचकुंभनिभौ हरिः
॥ १५ ॥ उत्कर्षवस्तु यत्तस्योपमानत्वं प्रकल्प्यते ॥ प्रख्यातस्योपमेयत्वमुपमानस्य यद्भवेत्
निष्फलत्वं वचो यच्च तत्प्रतीपं त्रिधा स्मृतं ॥ क्रमेणोदा० ॥ अहमेव गुरुः सुदारुणानामिति
हालाहल तात मास्म दृप्यः ॥ ननु संति भवादृशानि भूयो भुवनेस्मिन् वचनानि दुर्जनानां

अत्र परमहारुणत्वेन हालाहलमुत्कर्ष्य दुर्जनवचनस्योपमानं तत्कल्पितं ॥ विधुरःश्रेया
नूयत्तेनाप्युपमीयते ॥ कृशोदरि तवाननमुखेन मृगलांछनः ॥ विधाय वेधा वदनं मृगा
क्ष्या निरीक्ष्य चंद्रं सृयिणं जडं च ॥ अस्तुद्रमस्या वदने सविज्ञः कलंकमस्यांकतयां चकार
एतस्मिन् वदने सति निष्फलोयं विधुरिति तत्रांकमसीक्षेपः ॥ सू॥ भवेत्संभावनोत्प्रेक्षा
त्रेधा वस्त्वादि भावतः ॥ वस्तुनो वस्त्वंतर भावेना हेतोर्हेतु भावेना फलस्य फल भावेन सं
भावना त्रिविधोत्प्रेक्षा उत्कटतया प्रकृष्टस्योपमानस्य सा प्रतीतिर्यामादुत्कटोपमानको
टिकः संशयः स इत्यर्थः ॥ क्रमेणोदा॥ जृंभानुबंधविकसद्वदनोदराणां चंद्रः करेण कृपये
व कुमुद्वतीनां ॥ निर्वर्ण्य गाढविरहानलमुच्चलंतमंगारपुंजमिव कर्षति भृंगसंघं ॥
॥ अत्र भृंगसंघस्वरूपस्य निर्वर्णितांगारपुंजस्वरूपत्वेन संभावना स्वरूपोत्प्रेक्षा ॥ उप
मानस्य हुतवहपुंजस्योत्कटा प्रतीतिरस्ति ॥ सा राधिका मदधिकेति रुषातिताम्रः श्वंशो विजे
तुमुद्यतं जगाम ॥ वीक्ष्याथ तस्य दलसन्नखरांशुजालं पांडुर्विदग्धहृदयः सवनूवसघः

अत्र पूर्वार्धारोहणेदिक्रमणे भ्रमिविचरतो विधोरक्लिमपांडिमच्छौ लांछनव्यक्तिः स्वाभा
विकी ॥ सा चात्र श्रीराधिकाविजगीषानदंध्रेन स्वरांशुकैः दर्शनिकृतात्मतिरस्कारहेतुक
त्वेन संभाव्यते ॥ न च तस्यास्तद्विजिगीषादिहेतुरित्यसहेतोर्हेतुत्वेन संभावनाद्धेतूत्प्रेक्षा ॥
वीरस्यावलग्नं सरसीरुहाक्ष्या विभज्यमानं स्तनयोर्भरेण ॥ तयोर्विधृत्यै विधिरद्भुतानि व
वंधनतूर्किं त्रिवलीलतानि ॥ अत्र मध्यः स्वयमेव स्तनौ धरति न तु लतावंधनभावेना
ध्यवसितायास्त्रिवलीशालितायाः सामर्थ्यादिति मध्यकर्त्तृकायाः स्तनविधृतेस्तत्फल
त्वेन संभावना फलोत्प्रेक्षा ॥१७॥ द्योत्यार्थद्योतनं मुद्रा शब्दैः प्रकृतवाचिभिः ॥ यथा ॥ पुष्प
मार्गणमनोरथोद्धतेत्यादि ॥ अथ नायिकाया वर्णनपरेण रथोद्धताशब्देन रथोद्धताख्य
स्य स्वच्छन्दसः संसूचनं मुद्रा ॥ एवमन्यत्र च बोध्यं ॥ विचित्रं तद्विनैक्यं चेत्कुर्यादिष्ट
फलाप्तये ॥ यथा ॥ नमन्तुन्नतये प्राणान्मुंचत्याजीवनाप्तये ॥ दुःखीयन्ति च सौख्याय
कोमूढः सेवकात्परः ॥१८॥ समाधिः सुकरं कार्यं यादृच्छलंतरागवेत् ॥ यथा ॥ प्रणम्य

रूपकस्य २ निंबफले ३ आम्रे ३

काव्यको० पादोऽस्य मानुजायाः प्रासादनं कुर्वन्ति पंकजास्ते ॥ तथांबुदः प्रांशुजगज्जविस्तस्तटीयथासौ
मदसास्य नेजे ॥ २० ॥ समं स्यादानिरूपेणश्लाघा चेद्योग्यवस्तुनः ॥ यथा ॥ विसर्गव्यत्र
३२ चित्तोऽपि विधिर्युक्तविधानकः ॥ पिचुमर्दफले काकः सहकारे कृतः पिकः ॥ २१ ॥ सार
37 स्यात्प्रांतविश्रांतोऽपयधुत्कर्षो यथोत्तरं ॥ यथा ॥ राज्ये सारं वसुधा वसुधायां पुरं पुरे सौधं
सौधे तल्पं तल्पे वरांगनानंगसर्वस्वं ॥ २२ ॥ श्लेषस्त्वेकार्थकैः शब्दैर्यदनेकार्थवाचनं यत्रा
प्रवर्त्तयन् क्रियाः साध्वी मालिन्यं हरितां हरन् ॥ नृपसमासमहसादीप्तो विराजति दिवाकरः
अत्र रविर्नृपविशेषश्च वाच्योऽभिधायाः अनियमात् ॥ तत्रैकाभिधया परस्तु तत्तुल्यया
लक्षणया बोध्यः ॥ २३ ॥ नष्टेऽपि दृष्टो तत्कार्यं यदि दृष्टं तदा भवेत् ॥ पुनः स्वगुणलं
धिर्वा पूर्वरूपं तदा द्विधा ॥ क्रमेणोदा० ॥ ज्योत्स्न्यां चिरहतो रात्र्यां रत्नोरेस्तमगाद्विधुः ॥
अनूज्योत्स्नी तथैवासीत्तयोर्वदनकांतिभिः ॥ नवकरकमलस्थां स्फाटिकीमक्षमालां
नखकिरणविभिन्नां दाडिमीबीजबुध्या ॥ अनुकलमनुकर्षन्येन कीरो निषद्धः स भव

तुमममन्तूस्येवाणितेमंदहासः ॥२४॥ ततरं तूत्तरं श्रुत्वा प्रश्नश्चेत्परिकल्प्यते ॥ बहूनि वा वि
चित्राणि प्रश्नप्रतिवचांसि तत्र ॥ क्रमेणोदा- ॥ मधुरमिसो रमन्तो मातृ पतितान् मसनानि
नाविते मधुपान् ॥ विदितं न निवारयंस्तानु मयानवरस स्तं तदा स्मृदिते ॥ अत्रत्व हस्तसि
कस्माद्दमूनि स्वतानीति प्रश्नोगम्यते ॥ किं गेयं भगवन्नाम किं पेयं तत्कथामृतं ॥ किं दृश्यं मु
रुवे मुखं किं ध्येयं तत्पदांबुजं ॥ नचेयं सप्रश्नपरिसंख्या अन्यव्यपोहे तात्पर्य्याभावात् ॥२५
यष्टं किंचिदृष्टं वायघुक्तं परिकल्प्यते ॥ तत्सामान्यनिरासाय परिसंख्या तदा भवेत् ॥ किं
चिद्वस्तु पृष्टमपृष्टं वा गंदितं सद्यदि तत्तुल्यान्यव्यावृत्तये कल्प्यते तदा परिसंख्या नेत्रो भ
यत्र व्यावर्त्यमंग्यं वाच्यं चेति चतुर्द्धासौ ॥ तत्र पृष्टं यथा ॥ कः खलु चिंतनविषयो रघुपति
रिह के पुनः पूज्याः तत्सेवकान चान्ये तत्पदपंकजवंदितेः तां ॥ अपृष्टं यथा ॥ ध्येयो बुद्धि
मता कृष्णो भगवो व जगदीश्वरः ॥ सेव्या वेदविदो विप्रा नेतरन्ये हेतुवादिनः ॥२६॥ क्रमः स्या
त् क्रमिकाणां चयहानां क्रमतोन्वयः ॥ यथा ॥ मृगमीनसज्जनानां जलसंतोषविहितवृ

काव्यको. चीनां॥ लुब्धकधीवरपिशुना निःकारणवैरिणो जगति॥ इमं यथासंख्यमाहुः॥२७॥ क्र
३२ मादेकमनेकस्मिन् पर्यायोऽसमयाद्वयः॥ एकं वस्तु चेत् क्रमेणानेकत्र स्यात् अनेकं चैकत्र
33 तदा पर्यायो द्विधा॥ क्रमेणोदा०॥ चेतो मदीयं चिकुरे नियम्य स्वत्वाद्विलसंति नितंबविन्यो
यत्र चित्रांबरांचिताः॥ विचरंति शिवास्तत्र तत्र देहि नवने विनो॥२८॥ उपमा रूपकं प्रा
हुर्भेदे सति तिरोहिते॥ सांगं तत्स्यान्निरंगं च परं परितमेव च॥ सांगं यथा॥ माधुर्य्यम
धुभिः पूर्णं दृशानद्युतिकेसरं॥ हरिनेत्रालिनीपीतं राधावदनपंकजं॥ निरंगं यथा॥ मुखं
दुस्तव गोविंद प्रकाशयति मे मनः॥ यस्य कस्यचिदारोपः परस्यारोपको यथोदा०॥ तत्सरं
परितं श्लिष्टाश्लिष्टशब्दविनिर्मितं॥ क्रमेणोदा०॥ कमलामोदरोलंबो मदसंकस्तयाश्रुमा
न् योगिमानसहंसोऽयं नवताद्भवतापजित्॥ अत्र कमलायामोदएव तु कमलानामामोद ए
वमाद्यारोपो भगवतो रोलंबत्वाद्यारोपकः॥ हरिद्विपगजपंचास्यो दुर्नयांबुधिमंदरः॥ दान
वारण्यदावाग्निर्दुःखं दामोदरोऽवतु॥ अत्र हरिद्ध्यादेर्गजत्वाद्यारोपो भगवतः पंचास्यत्वा

धारोपकः ॥२८॥ परिणामः क्रियार्थश्चेद्विषयी विषयात्मना ॥ आरोप्यश्चेदारोप्यविषयात्म
ना क्रियार्थः प्रकृतक्रियोपयोगी स्यात्तदा परिणामः ॥ यथा ॥ कुद्धेन सास्मितकमलेन ददर्श
कांतं ॥ अत्र कमलमस्मितेन परिणतं सत् प्रकृतां दर्शनक्रियां निर्वर्त्तयति ॥३०॥ प्रकृतं
यन्निषिध्यान्यत् स्थाप्यते सा त्वपह्नुतिः ॥ उपमेयं प्रतिषिध्य यदुपमानस्थापनं सापह्नु
तिः ॥ उदा० ॥ अंकं केपि शशंकिरे जलनिधेः पंकं परे मेनिरे सारंगं कतिचिच्च संजगदिरे भूच्छा
यमेके परे ॥ इंदौ यद्दलितेंद्रनीलशकलश्यामं दरीदृश्यते तत्सांद्रं निशि पीतमंधतमसं कु
क्षिस्थमाख्यायते ॥ अत्रेंदोः कलंकादिकं प्रकृतं निषिध्यापीतमप्रकृतं तमः स्थापितं ॥३१॥ व्या
जस्तुतिस्तुनिंदायाः स्तुतेर्वाव्यंग्यया भवेत् ॥ निंदास्तुतिभ्यां वाच्याभ्यां स्तुतिनिंदे चेत् क्रमाद्व्यंग्ये
स्यातां तदा व्याजस्तुतिः ॥ क्रमेणोदा० ॥ न जातं तव पादपंकजं न च किंतु फलमत्रवीक्ष्यते ॥ अ
पि तु स्वजनादिविच्युतिर्विदितं ते चरितं मयाच्युत ॥ अत्र निंदया स्तुतिर्व्यज्यते ॥ जगति त्वत्स
मो नान्यः स्पृहावान्नृपः समीक्ष्यते ॥ हरिकीर्तिनरत्नानि कंठेपत् कुरुषे न हि ॥३२॥ अन्योन्यं

क्रियया चेत्स्यादुपरागः परस्परं एकजातीयया क्रियया मिथश्चेदुपकारस्तदान्योन्यं ॥ उदा-
राधया माधवो भातीत्यादि ॥ अत्र दीप्तिजननक्रियया मिथो द्वयोरुपरागः ॥ ३३ ॥ आधारा
धेययोरेकस्याधिक्येऽधिकमिष्यते ॥ आधाराधिक्ये यथा ॥ वर्षसि व्रजराजेस्य नीत्वा
क्तमिव यद्वपुः ॥ कलीन्द्रेणाप्यगण्याये कथं मांत्यत्र ते गुणाः ॥ आधेयाधिक्ये यथा ॥ य
स्यांतः सकलं विश्वममस्य जो कुलेश्वरी ॥ विप्रवीसो ज्ञातामोदात्तस्मिन् वपुषि नाममुः ॥
॥ ३४ ॥ विनोक्तिस्तु विनैकं चेत् सन्नसन्वा निबध्यते ॥ एकेन विनायद्येकः शोभनोऽशोभ
नो वा स्यात्तदा विनोक्तिः ॥ क्रमेणोदा० ॥ विनाकंचुलिकां धत्ते वनिता च तचारुतां ॥ रामारू
पाजि रामापि न भाति विनयान्विना ॥ ३५ ॥ व्याजोक्तिस्तु यद्व्यक्तं छन्नाविनिगूह्यते
यथा ॥ मदुरसीत्यादि ॥ अत्र कान्तकृतानि नखक्षतानि मंगचक्षस्तस्वनस्वक्षतव्याजेन गो
पितानि ॥ यथावा ॥ कुन्दोज्ज्वलवनमालं कामयते का न माधवं प्रमदा ॥ हृदये स्पृहय
सि राधे न हि न हि वैरिणि वसंतायः ॥ यथाभुवा ॥ प्रजल्पन्मत्पदे लग्नः कान्तः किंनहि नू

नूपुरः समासोक्तिर्यदि श्लिष्टैः परोक्तिः स्याद्विशेषणैः ॥ कलानिधिरसादेसो सायं रक्तो विजयते
नतांमिति तुर्य्यपादः ससुदाहरणं ॥ अत्र श्लिष्टविशेषणमाहिम्ना चंद्रस्यापि प्रतीतिः ॥३७॥
सहोक्तिः पदमेकं चेत सत्सार्थो वाचविकं द्वयोः ॥ उदास्मितेनेन सह कांतस्य तस्या विकसि
तं मनः ॥ यथावा ॥ सहाधरतलेनास्या यौवने रागवान् प्रियः ॥३८॥ अत्रद्भुतास्यतसोर्यादि
रव्यातिरसुक्तिरुच्यते ॥ यथा ॥ राजन् सप्ताप्य कूपारास्त्वत्प्रतापाग्निशोषिताः ॥ तदैरिराजु
वनिताबाष्पपूरेण पूरिताः ॥ यथा वा ॥ यच्छंतमर्थानि विबुधान् जनेभ्यः श्रुत्वाचीरीमंनृपसार्व
भौममभ्रू ॥ कल्पद्रुमा याचकभाव नाजस्तस्य प्रतीहारतटी नजंते ॥३९॥ डिंभादिनिजचेष्टो
क्तिः स्वभावोक्तिरुदीर्यते ॥ यथा ॥ मुखपुटनिहितकरांगुलिरुच्चलचरणः सदेवकीसू
नुः क्षणरुदितस्मितकुशलो व्रजकुल्वमुदमतितरामतनोत् ॥४०॥ निरुक्तिश्चेद्गवेन्नाम्नां
योगादन्यार्थकल्पना ॥ यथा ॥ स्वज्ञातिशत्रोः शक्रस्य संछेदनपरिमुल्वणं ॥ दधाराकृपय
मन्वर्थमिष्वगोवर्द्धनो गिरिः ॥४१॥ प्रकृतस्योपमानेन यो निगीर्णस्य निश्चयः ॥ अन्यदेवेति य

काव्यको- ध्वस्तुतदेव परिकीर्त्यते ॥ यत्तु चेद्यदिशब्दाभ्यामसंभाव्यार्थकल्पनं ॥ यो वैचित्र्यात्प्र
३५ यो यश्च वर्ण्यते हेतुकार्ययोः ॥ प्योगेप्ययोगो ॥ योगेपि योगो यः परिकल्प्यते ॥ षड्विधाति
शयोक्तिः साकविभिः समुदीर्य्यते ॥ अंतर्निगीर्णस्योपमेयस्य यदुपमानेनानिरूपिणं
सातिशयोक्तिः ॥ प्रथमा यथा ॥ जातालत्वादिशैलेजातुलतायांनजायतेशैलः ॥ संप्रति
तद्विपरीतं कनकलतायां गिरिद्वयं जातं ॥ अत्रैलतया नायिका निगीर्यते ॥ गिरिभ्यां तुस्त
नद्वयुग्मं ॥ यच्च तदेव वस्त्विदमन्यदेवेति वर्ण्यते सा द्वितीया ॥ यथा ॥ अन्यदेवांगलावण्य
ण्यमन्यासौसंपदः ॥ अस्याः परायलागास्याः सरसत्वमलौकिकं ॥ यदि चेच्छब्दाभ्यामस
संभाव्यार्थस्य यत्कल्पनं सा तृतीया ॥ यथा ॥ प्रवालान्मुक्ताद्युतिपुष्पजालश्चलन्नु यदि
स्यात्कनकाककमूलः ॥ नापि छशाखीश्रिरिवपिछमो लसलेहास्यहास्यायदधीतचेवः ॥
हेतोः शीघ्रकारितां वक्तुं कार्यस्य यत्प्रागवचनं योगपद्यं वा सा च तुर्थी ॥ क्रमेण यथा ॥ जातः
संसतिसर्पस्य पूर्वं दर्पे परिस्रयः ॥ श्रीरंगिसंगिनो संगः संप्रतिप्रतिपद्यते ॥ नजंतियुग

यद्वीर ज्यां रिपुश्चैव तवैव सः ॥ संबंधेपि सति यदसंबंधकल्पनं पंचमी ॥ यथा ॥ अनयोरनवद्यांगि
स्तनयोर्जृंभमाणयोः ॥ अवकाशो न पर्याप्तिस्तव बाहुलतांतरे ॥ अत्र बाहुमध्ये स्तनावकाशयो
गेपि तदयोगो वर्णितः ॥ असंबंधे संबंधकल्पनं सा षष्ठी ॥ दिनैः कतिपयैरेव याव ॥यथा॥
त्स्यं मेरुर्दिनांतकृत् ॥ इदं ज्योतिर्मुदं कोकीदातरि त्वयि रूपते ॥ अत्र चक्रवाक्यादिवसावनकारि
सुमेरुविनाशसंभावनसंयुक्तानंदासंबंधेपि तत्संबंधो वर्णितः ॥ ४२ ॥ हेतौ सति फलाद्यक्ति
विशेषोक्तिरुदीर्यते ॥ यथा ॥ अनुरागवती संध्या दिवसस्तत्पुरःसरः ॥ अहो दैवगतिश्चित्रा
तथापि न समागमः ॥ यथा वा ॥ शय्यानाहं स्तोके मृदुलमुपधायाधरदलं हरेर्मंदां दोलालक
ततिर्निरावीज्य तनुं ॥ दधाना माशंकां गुलिभिरभिसंवाहनविधिं तथाप्येषा वंशी न दहिमजति
निद्रालवमपि ॥ ४३ ॥ युक्तिः कथंचिच्छक्के च्छेलक्रियया विनिगूह्यते ॥ यथा ॥ दंपत्योर्निशि ज
ल्पतोर्गृहशुकेनाकर्णितं यद्वचस्तत्प्रातर्गुरुसंन्निधौ निगदतस्तस्याति मात्रं वधूः ॥ कर्णालं
वितनपद्मरागसकलं विन्यस्य चंचूपुटे श्रीडार्त्ता विदधाति दाडिमफलव्याजेन वाग्बंधनं ॥ व्या

जोक्तिर्वाचा गुप्तिरिह तु क्रिययेति भेदः ॥५५॥ लोकवादानुकारस्तु लोकोक्तिर्जल्पते बुधैः ॥
यथा ॥ नामैव ते वरद वांछितदातृभावमाख्यात्यतो न वहसे वरदानमुद्रां ॥ विश्वप्रसिद्धतरवि
प्रकुलप्रसूते यज्ञोपवीतवहनं हि न खल्वपेक्षम् ॥ अत्रोत्तरार्द्धे लोकप्रवादानुकरणं ॥ लोको
क्तिरेव छेकोक्तिर्भवेदर्थान्तरान्विता ॥ लोकोक्तिरर्थान्तरगर्भा छेकोक्तिः ॥ यथा ॥ अहिरेव हि
जानीयादहिपादान्न चापरः ॥ कस्मिन्वने कृष्णोऽद्य क्रीडन्तुमिच्छतीत्यकस्मिन् सख्यो कंचित्स
ख्यायं ॥ पृच्छति सति कृष्णान्तिकस्थां सुवल्लमुद्दिश्य सनर्म्माह अहिरेव हीति ॥ लोकप्रवादानुकारो
यं ॥ स चास्य स्मारंस्मारमप्ययमेव चेत्तीर्थान्तरंगनीकरोति ॥ ५७ अहेतौ हेतुवाक्येभिः प्रौढोक्ति
रिति कीर्त्यते ॥ कार्यातिशयाहेतौ तद्धेतुत्वकल्पनं प्रौढोक्तिः ॥ यथा ॥ कल्पतरुकामदोग्ध्रीचिं
तामणिधनदशंखानां ॥ रचितो रजोभिरयशस्तेजः श्वासैरन्तराचरैरेष ॥ अत्र राज्ञो निहासत्वं
वर्ण्यते ॥ तत्वे च कल्पद्रुमादिपंचनिर्मितत्वं हेतुर्न तु वस्तुतस्तद्धेतुमि ॥५८॥ मिथ्याध्यवसितिर्मिथ्या
सिद्ध्यै मिथ्यार्थनिर्मितिः ॥ यथा ॥ गोविन्दं चरणे हं मायावादविशारदः ॥ लभते मच्छिदानं तदं ख

पुष्पस्तवकं वहन्॥ न चेयं तृतीयातिशयोक्तिः॥ चेद्यदिशब्दाभ्यामसंभविनोर्थस्य कल्पनात्॥ धृ
फलोत्पत्तिर्विना हेतुं यत्र स्यात् सा विभावना॥ यथा॥ अपीतक्षीवकादंबमसंमृष्टामलांबरं॥ अ
प्रक्षालितसूक्ष्मांबुजगदासीन्मनोहरं॥ अत्र हेतोरकात्स्न्ये प्रतिबंधत्वे कार्यविरूपत्वे हेतुत्वेना
ख्यातां तां च केचिद्विभावनां मन्यते॥ क्रमेणोदा- उद्यानमारुतोद्धूतचूतचंपकरेणवः॥ उदस्रयंति
पांथानामस्पृशंतोपि लोचने॥ अत्र स्पर्शक्रियावैकल्यमेव हेतोरकात्स्न्यता॥ चित्रं तपति राजेंद्र
प्रतापतपनस्तव॥ अनातपत्रमुत्सृज्य सातपत्रं द्विषज्जनं॥ अत्र तापहेतोः प्रतापतपनस्यात
पत्रं प्रतिबंधि॥ उदिते कुमारसूर्ये कुवलयमुदमति नातिनहत्रं॥ मुकुलीभवंति चित्रं पररा
जकुमारपाणिपद्मानि॥ अत्र कुवलयोल्लासादेः कार्यस्य सूर्योदयो नानुरूपो हेतुः॥ उभयत्र
विरोधाभासेन संकीर्णेयं॥ अंबुजमंबुनि जातं क्वचिदपि नो जायतेऽंबुजादंबु॥ मुरभिदि तद्विपरी
तं पादांभोजान्महानदी जाता॥ अत्र नद्याः कारणत्वेन ख्यातं नांभोजं॥ ५०॥ उपायेन विना सि
द्धिर्वांछितार्थस्य यद्भवेत्॥ उपायाद्यदुपायार्थादुपेयस्योपलंभनं यच्चेष्टान्यधिकार्थस्य सि

द्धिस्तत्स्यात्प्रहर्षणं ॥ क्रमेणोदा॰ ॥ मुनेर्दुर्वाससः कोपात्त्रातुमस्मान्नलं हरिः ॥ इति चिंतन्न
यो राज्ञस्तत्रासीत्स्वयमेव सः ॥ फलोपायसाधकाद्यत्नादंतरालिकोपायेसिद्धिमनपेक्ष्य
फलस्य लेचेत्साक्षात्प्राप्तिः स्यात्तद्दपि प्रहर्षणं ॥ यथा ॥ अंजनाय खनन्मूलमधारं निधिदृ
शनि ॥ अधस्तादंजनं तस्य सर्वदुःखहरं निधिम् ॥ अत्रांजननिरपेक्षो निधिलाभः ॥ यथा वा ॥
ध्रुवायैस्मृतये विद्या यशोवेश्मनि कीर्त्तयन् ॥ वकुल्याम्बानृपस्तस्मिंस्तमयस्येत्समागतं ॥ अ
त्र स्मृतिनिरपेक्षः साक्षात्कारः स्थानानि कामस्तपसि स्थितोहं त्वां दृष्टवान्साधु मुनीद्रगुह्यं ॥
काचं विचिन्वन्निव दिव्यरत्नं स्वामिन्कृतार्थोस्मि वरं न याचे ॥ ५१ ॥ यत्साक्षात्करणं भूतभावि
नां भाविके तु यत् ॥ यथा ॥ आसीत्कंचुलिकात्रेति पश्याम्यस्याः कुचद्वयं ॥ कलयामि नितंबं च
रणेध्वन्मणिमेखलं ॥ अत्र पूर्वार्द्धं भूतस्य साक्षात्कारः परार्द्धे तु नादिव ॥ परा ॥ उदात्तमतिसंप
त्तिवर्णनं कविभिः स्मृतं ॥ यथा ॥ अतिविंवितनिकुरंवैः करंवितमुकुरमुकुरमंदिरे कृष्णं ॥ च
तुरापि चतुर्मुखमभून्मुनिरति कृष्टाद्वोधिष्ट ॥ ५३ ॥ परिविन्निः स्मृतार्थानां यस्याद्भिनि मयामिथः ॥
यथा कृष्णाद्दंकसज्जं नी त्वामोणि मानान्मधात्प्रिया गृहीत्वा सतु साचीस्रामदा द्वंद्वोजपीडनं ॥५४॥ विद्यमानासोनिषेधेपि विधिश्चद्यक्रमीदृयते ॥

॥यथा॥ गच्छ गच्छसि चेत्कांत पंथानः संतु ते शिवाः॥ ममापि जन्म तत्रैव भूयाद्यत्र गतो भवान्
अत्र त्वयि गतेहं न जीविष्यामि तत्त्वया न गंतव्यमिति निषेधो गच्छेति विधिदर्शितः॥५५॥ अवि
रोधे विरोधित्वं विरोधाभासमुज्जगुः॥ जात्यादीनां तु जात्याद्यैः स स्याद्दशविधो मतः॥ यथा॥
दावस्त्वद्धिमवातः पंकजमुखाभ्भासवर्षि चंद्रमुखि मर्मकृतः खलु मधुपाश्चैलं च हल्लाहल्लं कि
मिदं॥ अत्र वाल पंकज मधुप चैल शब्दा जातिवाचकाः॥ दावोष्मकृत् हल्लाहल शब्दास्तु क्रमा
ज्जातिगुणक्रियाद्रव्यवाचकाः तेषामेतेषां च क्रमाद्विरोधवदवभासः॥ यथा वा॥ ध्वनिः
पिकानां मधुरोप्युत्कटुः शीतोपि दाहं तनुते स्म मारुतः॥ सुकोमलोप्यच्युतपुष्पकं दु
को नवद्वियोगपविरेव सुभ्रुवः॥ अत्र मधुर शीत कोमल शब्दा गुणवाचकाः कटु दाह पवि
शब्दाः क्रमाद्गुणक्रियाद्रव्यवाचकाः॥ एवमन्येपि भेदा बोध्याः॥ परान्न वंफे निले वक्रतां
व वंधं च नीतिं च मृतिं च कृत्वा॥ पवर्गदातापि शिखंडमौले त्वं शातवाणो म पवर्गदासि
जहार हृद्यं रामा हारिण्यपि विहारिणी मम सेव माद्विष्णुप्लय विच्छित्तिकः सः॥५६॥ पर्या

योक्तं यदा तदा गुणं वाच्यवदिष्यते ।। यथा ।। गवेन्निसगिरि कं वासं विजहो रति चेतसि ।। हृदि
दासरथे धैर्य्यं विलोक्य जनकात्मजा ।। अत्र रतिर्निर्गर्वा रामो निधैर्य्यं इति व्यंग्यो प्यर्था
नंगी विशेषणनिबंधा वाच्यवत् प्रकाशते ।। ५१ ।। एकस्य बहुधा ऽनेकैरवादुध्नेरवः स्यादुल्ले
कृतिः ।। यथा ।। प्रिय इति गोपवधूभिः शिशुरिति वृद्धैरधीश इति देवैः ।। नारायण इति भ
क्तैर्ब्रह्मेत्यग्राहि योगिभिर्देवः ।। ५२ ।। प्रकृताप्रकृतानां यद्धर्मैक्यं दीपकं तु तत् ।। एकक्रि
यासु बह्वीषु कारकं यदि तन्मतं ।। तद्दीपकं ।। क्रमेणोदा॰ ।। नदीनां च वधूनां च भुजगानां
च सर्वदा ।। मन्मथानामपि गतिर्वक्रा कारणं तत्र नेष्यते ।। अत्र प्रकृतानां नद्यादीनां प्रकृता
नां प्रमदानां च वक्रगतिरेको धर्मः ।। द्विःशरान्नाभिसंधत्ते द्विःस्थापयति नाश्रितान् ।। द्विर्द
दाति न चार्थिभ्यो रामो द्विर्नाभिभाषते ।। अत्रैकं कर्तृकारकमभिसंधानादिषु क्रियासु सं
बंधं दृश्यत्यन्वयायोगः ।। यथावा ।। मा हृते चिंतये त्वं तु वैयिवे वीक्ष्य सादरं म ।। पर्दा ।।
मालादीपकमाद्यं चेद्यथोर्द्धमुपकारकं ।। यथा ।। त्वयि संगरसंप्राप्ते धनुषासादिताः

शराः ॥ शरैरिशिरस्तेन नृत्यालं तयाथशाः ॥ यथा वा ॥ आग्येनृत्याम भवानप्रोक्तोम
वतामहितामतिः ॥ मत्वा मुमुक्षा रणं चरणं मुरवैरिणः ॥ अत्र नृत्यादिभिः पूर्वपूर्वैरुत्त
रोत्तरेषु नवसादिषु प्रासंगिकक्रियाकर्मत्वविधानरूपा परिकृतिः ॥ ६० ॥ वर्ण्यानामितरेषां वा
धर्मैक्यं तुल्ययोगिता ॥ प्राकरणिकानामेकधर्माभिसंबंधस्तुल्ययोगिता ॥ अप्राकरणिका
नां वा सत्तथा ॥ क्रमेणोदा० ॥ आयुः श्रियं यशो धर्मं लोकानाशिष एव च ॥ हंति श्रेयांसि सर्वा
णि पुंसां महदतिक्रमः ॥ अत्र महदतिक्रमनाश्यत्वेन प्रकृतानां पुरुषायुःप्रभृतीनां हंति
रूपैकक्रियया संबंधः ॥ त्वदंगमार्दवे दृष्टे कस्य चित्ते न भासते ॥ मालती शशभृल्लेखा क
दलीनां कठोरता ॥ अत्र नायिकासौकुमार्यवर्णनाप्रस्तुते ॥ प्रस्तुतानां मालत्यादीनां कठोर
त्वरूपैकगुणसंबंधः ॥ ६१ ॥ मीलितं त्वनि सादृश्याद्भेदश्चेन्नैव लक्ष्यते ॥ उदा० ॥ श्यामले कु
जकस्तूरीजनैर्नाधिवक्षसि ॥ अलिके तलकं कंचापि गोरिकां के मधुद्विषः ॥ ६२ ॥ कुतश्चि
द्भेदज्ञाने तु प्रोक्तमुन्मीलितं बुधैः ॥ उदा० ॥ राधे तडित्प्रोरित वेषगंडयोः कर्णवल्लं बीन

वकेतकीछदः ॥ नसौरभेणापिमनोविभिन्नतो मधुव्रतेनैषविविच्यबोधितः ॥ ६२ ॥ सामा
न्यमतिसादृश्याद्विशेषस्यानुलक्ष्यते ॥ उदा॰ ॥ मल्लिकामल्लधारिण्यः सर्वांगीणार्द्रचं
दनाः ॥ क्षौमवत्यो न लक्ष्यन्ते ज्योत्स्नायामभिसारिकाः ॥ ६४ ॥ विशेषस्य कुतश्चिद्यज्ज्ञानं
तस्माद्विशेषकः ॥ उदा॰ ॥ आसन्नपद्माकरस्त्रीणां पद्मान्यास्यानि संप्रति ॥ लक्षितान्युदि
तेचंद्रेपद्मान्यास्यानिचस्फुटं ॥ ६५ ॥ मीलितेहारहरणो श्यामतातिसाम्यादसौ सः पृथक्क
स्तुरीनालक्षते ॥ सामान्योदाहरणे वस्तुपार्थक्यावेनासशेषाख्यातिसाम्याद्व्यावर्तक
विशेषो नोपलभ्यते ॥ उन्मीलितविशेषकौ तु तयोः प्रतिद्वंद्विनावन्वर्थौ यस्मिन्विशेष
सामान्यविशेषाः ॥ सविकस्वरः प्रस्तुतविशेषसमर्थनाय सामान्यमुपन्यस्यापरितो
षात् पुनर्विशिषस्यैवदुपन्यस्यते तदाविकस्वरः ॥ उदा॰ ॥ अनंतरत्नप्रभवस्य तस्य हिमंन
सौभाग्यविलोपिजातं ॥ एकोहिदोषोगुणसंनिपाते निमज्जतींदोः किरणेष्विवांकः ॥ तस्य
हिमाचलस्येति प्रकरणात् ॥ ६६ ॥ एकस्य गुणदोषाभ्यां यदि स्यात्तां परस्य तो ॥ क्रमतो

श्रुतः क्रमात्स्वेपि तदोषस्त्रासस्यानुविधिः ॥ लोगुणदोषो कुसुमावचयादिं समस्तयायतत्परिपीडि
तः ॥१०॥ कः कृतीमुंदरगात्रशोभमगं नुवाधरः ॥ अत्र नासिकाबाधर्म्यगुणेन तन्निपीडितस्यस्वा
सस्य कृतित्वगुणोनि रूपितः ॥ दोषगुणदोषो यथा ॥ लोकानंदनचंदनद्रुमसखे नास्मि
न्वने स्थीयतां दुर्वंशैः कठिनैरसारहृदयैराक्रांतमेतद्वनं ॥ ते ह्यन्योन्यनिघर्षजातदहन
ज्वालावलीसंकुलान स्वान्येन कुलानि केवलमिदं सर्वं दहेयुर्वनं ॥ अत्र वेणूनां परस्पर
संघर्षसंजातदहनसंकुलत्वदोषेण वननाशरूपो तदोषो वर्णितः ॥ गुणेन दोषो यथा ॥
पानार्थिनो मधुकरा यदि कर्णतालैर्दूरीकृताः करिवरेण मदांधबुद्ध्या ॥ तस्यैव गंडयुगमं
डनहानिरेषा भृंगाः पुनर्विकचपद्मवने चरंति ॥ अत्र मधुपानामलंकारित्वगुणेन गजस्य त
त्प्रतिसेवादोषलेनोक्तः ॥ दोषेण गुणो यथा ॥ आघ्रातं परिचुंबितं प्रतिमुहुर्लीढं पुन
श्चर्वितं त्यक्तं वा भुवि नीरसेन मनसा तत्र व्यथा मा कृथाः ॥ हे सद्रत्न तवैव दैवकुशलं यत्पा
नरेणाहरादतः सारविचारणव्यसनिना चूर्णीकृतं नाश्मना ॥ अत्र वानरस्य चापल्य
दोषेण रत्नस्य चूर्णनाभावो गुणलेशेन वर्णितः ॥ अत्रायं तयोरुन्नासानुवृत्थः मधस्या

काव्यको·

५०

स्तुष्ठत्रित्यागेन लाक्षणिकः ॥६७॥ अवज्ञा गुणदोषाभ्यां न स्यात्तौ चेत्क्रमेण तौ ॥ तौ गुणदो
षौ ॥ एकस्य गुणदोषाभ्यां परस्य चेद्गुणदोषौ न स्यातां तदावज्ञालंकारः ॥ तत्र गुणेन गु
णाभावो यथा ॥ गोविंदमरविंदाक्षं जगदानंददायिनं ॥ अथाक्षिपति चैद्यश्चेत्तेन किं तस्य
लाघवं ॥ अत्र जगद्वन्द्यत्वेन चैद्यहस्यासरूपगुणाभावः ॥ दोषेण दोषाभावो यथा ॥ हृष्य
त्यभ्युदिते यस्मिन् सुधांशौ निखिलं जगत् ॥ म्लायंति यदि पद्मानि का हानिस्तस्य वर्ण्य
ते ॥ अत्र पद्मम्लानिदोषेण चंद्रस्य लाघिमदोषाभावः ॥६८॥ दुःखस्याभ्यर्थनानुज्ञा त
स्मिन्नेव सुखेक्षत् ॥ यथा ॥ विपदः संतु नः शश्वत्तत्र तत्र जगद्गुरो भवतो दर्शनं यत्स्याद
पुनर्भवदर्शनं ॥६९॥ प्रतिषेधस्तु सप्रसाको यः स्यात्तदभावनिर्णयः ॥ प्रतिप्रसिद्धो नि
षेधः ॥ स्वतोनुपयुक्तो यद्यर्थांतरं गमीकरोति तदा तेनैव चारुत्वोचितोयं प्रतिषेधालं
कारः ॥ यथा ॥ न विषेण न शस्त्रेण नाग्निना न च मृत्युना ॥ अप्रतीकारपारुष्याः स्त्रीभि
रेव स्त्रियः कृताः ॥ अत्र स्त्रीणां विषादिनिर्घृतत्वाभावः स्यात्तरां निर्णीयमानस्तासां क्रौ
र्यं विषादिभ्योप्यतिशयितमित्येतमर्थं गमीकरोति स चाप्रतीकारत्वेन नव्यक्तीभवति

॥७०॥ असंभाव्यतयार्थस्य निष्पत्तिः स्यादसंभवः ॥ यथा ॥ अयं वारामेको निलय इति
रत्नाकर इति श्रितोस्माभिस्तृष्णातरलितमनोभिर्जलनिधिः ॥ क एवं जानीते निजक
रपुटीकोटरगतं क्षणादेनं तस्यत्तिमिमकरमापास्यति मुनिः ॥७१॥ असंगतिर्भवेद्भिन्न
देशत्वे हेतुकार्ययोः ॥ यथा ॥ तवाधरोष्ठे क्षतमंजनं च ममव्यथा नेत्रमलिनं च चेतः ॥ पीतस्त्वया
तवदनामवस्त्वं मत्तः कृतानर्थपरंपरेयं ॥७२॥ वाछितप्रतिकूलार्थप्राप्तिस्तु स्याद्विषादनम्
यथा ॥ राज्याभिषेकस्थे चिरं तु जातो रामः प्रभाते सुखयेद्वनेनः ॥ इत्थं सुमित्रातनये ब्रुवाणे त
माद्रिलपङ्क्तिरयो वनाय ॥७३॥ हेतोः कार्यात्मनाख्यानं हेतुरित्यभिधीयते ॥ यथा ॥ अद्रीणां वि
द्रुतिः साक्षाद्राक्षसिंजनमुक्कवा ॥ स्थेयं स्रोतस्वतीनां तु जीयाद्वंशीध्वनिर्विभोः ॥ अत्रादिविद
वादो हेतुरपि वंशीनादस्तद्धेतुरूपतया निबद्धः ॥७४॥ अनुकूल्यैकप्रातिकूल्याद्यदि स्यादनु
कूलता ॥ यथा ॥ हार्यो सिपमितः पयोधरं नखैः पीडितः ॥ मया लिजे रविदादशनैः क्षताध
रपुटेः श्रोणीतटे नाहतः ॥ हस्तेनानमितः कचे धरसुधापाने न संमोहितः कांतः कामपि तामि
मायतदृहो कामस्य वामा गतिः ॥ यथावा ॥ कंसः कृष्णहतः प्राणो मम ज्ञोनंद संपदि ॥७५॥ दं

डापह्नुतिकयान्यार्थारोपोऽर्थापह्नुतिरिष्यते ।। मृषकेणेदस्थोदंडश्चंद्रस्मितस्मर्दितदंतिकस्थोमृषा
पिनस्तिल एवेत्सपूयन्तलक्षणमर्थादागतमितिन्यायादंडपूपिका ।। यथा ।। हारोऽयं हरिणाक्षीणां
लुंठति स्तनमंडले ।। मुक्तानामप्यवस्थेयं के वयं स्मरकिंकराः ।। यथा वा ।। म्लेछानामपि चेतां
सि हरंति भगवद्गुणाः ।। प्राचीनो वेदवेदांतवेत्तृणां का कथा पुनः ।। ७६ ।। निश्चयस्तु निषिध्यान्य
तं प्रकृतं चेन्निरूप्यते ।। यथा ।। हृदि बिसलताहारो नायं भुजंगमनायकः कुवलयदलश्रेणी
कंठे न सा गरलद्युतिः ।। मलयजरजो नेदं भस्म प्रियारहिते मयि प्रहर न्नांत्या नंग क्रुधा कि
मुधावसि ।। अत्र भुजंगादिकमप्रकृतं निषिध्य प्रकृतं मृणालहारादि स्थाप्यते ।। यथा वा ।।
वदनमिदं न सरोजं नयने नेंदीवरे एते ।। इह सविधे मुग्धदृशो मधुकर न मुधा परिभ्राम्यं ।। ७७ ।।
संदेहः स स्यान्नायः स्यात्प्रकृतेन्यस्य संशयः ।। निश्चयगर्भो निश्चयांतः शुद्धश्च सः ।। क्रमे
णोदाः ।। किमयमुदिरः कथं पृथिव्यां विधुरस्मिन्नयमत्र छोलांछनकः ।। इह किं चपलालोके
चापलं न तु किमुक्तः सुमुखः सपीनवासाः ।। मुखमस्याः किं कमले किमिंदुसारेण
निर्मितं धात्रा ।। आनंदयति मदक्षि भ्रमरचकोरौ यदस्यांतं ।। पलाशकुसुम भ्रांत्या शुकतुं

उपलब्धिः॥ सोपि जंबूफलभ्रांत्या तमलिं धर्तुमिच्छति॥१७॥ सादृश्यातिशयतो तस्मिंस्तद्बुद्धि
र्भ्रांतिमानुच्यते॥ यथा॥ त्वन्मूर्त्तिस्फुरितां स्वच्छे सा वीक्ष्य हरिवक्षसि॥ सपत्नीभ्रांतितः कां
तिमरुणां नेत्रयोर्दधौ॥१८॥ सादृश्यानुभवाद्वस्तुस्मृतिः स्यात् स्मरणं मतं॥ यथा॥ सरसां
पंकजं पश्यन्नु समस्मार वनिताननं॥ असंभवन्नवस्तुसंबंधो यदि वा कुत्रचिद्भवेत्॥ कल्प
यत्युपमां सा कीर्तिता द्विधा निदर्शना॥ तत्रासंभवद्वस्तुसंबंधनिबंधना॥ यथा॥ क्वाहं द
रिद्रः पापीयान् क्वायं श्रीपतिरच्युतः॥ तथार्त्तमुपसंयतो निपात्तः सोरसैधवः॥ अत्र पंचपू
ल्पः घटः कृपा इति वदन्त्वयोऽसंभवन्नका। वाक्यार्थयोर्बिंबप्रतिबिंबभावं कल्पयति॥ स च द
रिद्रस्य मम श्रीकांतसाक्षात्कारस्तत्पापार्त्तस्य गंगासंगम इवेति॥ यथा वा॥ आज्ञाभंगो नरेंद्रा
णां विप्राणां मानखंडनं॥ पृथक् सख्या वरस्त्रीणां मशास्त्रविहितो वधः॥ अत्रापि नृपाज्ञाभंगा
दिकं मशास्त्रकृतवधतुल्यमिति सज्ञावमावेदयति॥ यथा वा॥ सुभ्रु त्वद्वदनं धत्ते लीला
पीयूषदीधितेः॥ अत्र कथमन्यस्यान्यलीलाधारणमिति सादृश्यपर्यवसानं॥ अथ संभवद्वस्तु
वा॥ स च विधुकृतके रवविकाशस्य संपन्नकृतमुहस्तसादृश्यं च तज्ज्ञावमावेदयति॥८१

समुच्चयस्तु सार्द्धं चेत् स्यात् तं स्पंकत्रद्दृतत्वः गुणे क्रियेवा युगपत् स्यां तां किं वा गुणक्रिये ॥ व
हूनि कारणानि यदि खलेकपोतन्यायेनैकस्मिन् कार्ये सहितानि पतन्ति यदि वा गुणौ क्रि
ये गुणक्रिये गुणक्रिये च युगपद्युपन्निबध्येते तदा समुच्चयश्चतुर्धा ॥ क्रमेणोदा ॥ कुलं रू
पं वयो विद्या धनं च मदयत्यमुम् ॥ मधुरं च वचश्चास्य विशदं च मनो मम ॥ गतश्च मृत्युराक्रू
क्रूराः श्रीं प्रविष्टश्च हृदि ज्वरः ॥ रक्तं च तलिनो वक्रं सकंपश्च समुत्थितः ॥ ८२ ॥ नवे स्परि
करो नाम साकूतं चेद्विशेषणं ॥ उदा ॥ अमेध्यपतिजातस्य विटपात्रस्य विनाशिनः ॥ वपु
षः ॥ परिपोषाय मूढाः पापानि कुर्वते ॥ अत्र विशेषणानि सर्वथा विशेष्याभासत्वानि
प्रायगर्भाणि ॥ यथा वा ॥ एष लक्ष्मीपतिः कृष्णो दारिद्र्यमपनेष्यति ॥ अत्र लक्ष्मीपतिरि
ति विशेषणं दैन्यविनाशसामर्थ्यानि प्रायगर्भं ॥ ८३ ॥ साकूते विशेष्यस्य मतः परिक
रांकुरः ॥ यथा ॥ लिखितुं काव्यं कर्तवीर्यस्तु विजहतीमे पिचेक्षितुं ॥ वक्तुं शेषः प्रभुर्न मन्
का द्वमपक्कताः पुनः ॥ अत्र कार्तवीर्य इत्यादीनि विशेष्याणि सहस्रबाहुत्वाद्यानि प्रायग
र्भाणि ॥ सूक्ष्मं लीकृतचेष्टा चेत् स्याकूतं प्रकाश्यते ॥ स्यानि प्रायानि ज्ञं प्रति यदि तदा

कृतमंजकं चेष्टितं स्फुटतितद्वीधनायप्रकाश्यते॥ तदा सूक्ष्मं नाम॥ यथा॥ ललाटलग्नानलकान्स
मीक्ष्य सखीस्मेरमुखाश्चतुरा प्रजाते॥ लिलेखवतस्याः सशरं मृगाक्ष्याः शरासनं पाणिसरोजयोः सा॥
अत्र स्वाकूतानि ज्ञायानायिकायाः पाणौ धनुर्बाणे लिखनरूपं चेष्टितं त्वयापुरुषवल्लिशि चेष्टितमि
त्याकूतं पृष्ठ्याः खलु धनुर्बाणे नृतोयष्ट्वर्वंति॥ यथा वा॥ कांतेमायांतमालोक्य मंदिरे चंद्रिराननना
चकार करकंजस्य कुड्मलीभावमुत्सुका॥ अत्र संकेतसमयावबोधाय गतेनिजाकूतद्वैनेतरिद्वा
धकमिदं चेष्टितं॥ रात्रिस्तत्समयद्त्याकूतं॥ ७५॥ हेतोर्वाक्यपदार्थत्वे काव्यलिंगमुदीर्यते॥ वाक्या
र्थः पदार्थो वा यदि हेतुः स्यात्तदा काव्यलिंगं॥ क्रमेणोदा०॥ यः कीर्त्तयति गोविंदं संसारस्तस्य नश्य
ति॥ स्वर्गग्रामटिकानेछेत्तः विंदार्पितमानसः॥ ७६॥ ननु वाक्यार्थगतेन काव्यलिंगेन कार्यका
रणभावीयोर्थान्तरन्यासश्चरितार्थस्तुमेवं॥ हेतुस्त्रिविधः॥ निष्पादकः समर्थको ज्ञापक
श्चेति॥ आद्यः काव्यलिंगस्य विषयः॥ द्वितीयोर्थान्तरन्यासस्य॥ तृतीयस्त्वनुमानस्येति पृथगे
व काव्यलिंगात्तज्ज्ञावीयः सः॥ ७७॥ विकल्पस्तुल्यबलयोर्विरोधे चातुरीयुतिः॥ यथा॥ पलत्स्वि
रलंवारिनत्संतिचपिरखंडिनः॥ अधकांतः कृतांतो वा दुःखस्यांतं करिष्यति॥ यथा॥ पत्तत्व

विस्तंवारि नृत्यंति च शिखंडिनः ॥ अत्र क्रांतकांतकर्त्तव्ययोर्दुःखनाशयोर्युगपज्ज्ञाताः संन
वाद्विरोधः ॥ तुल्यबललंच तयोः स्पर्द्धया संज्ञायमानत्वात् ॥ कांतायद्यागच्छेत्तदामरणं
नाशंक्ये मरणेतु कांतागमासंनवइत्युभयोस्पृहया विकल्पः ॥ अथ गर्भितायाश्चातुर्य्यमु ॥ यथा
वा ॥ युष्माकं कुरुतां भवार्त्तिशमनं नेत्रे तनुर्वा हरेः ॥ दीयतामुर्जितं वित्तं देवाय ब्राह्मणाय वेत्य
त्र नायमंलंकारः ॥ चातुर्य्यमात्रात् ॥ ८७ ॥ रत्नावली क्रमाध्यक्तिः स्यात्साहित्यशालिनां ॥ उ
दा॰ महापद्मः पद्मार्चितचरणः शंखांचितकरः अवोन्मूषामास्यन्मकरविलसत्कंठ पववपुः मु
कुंदः सकुंदस्तुतशरदनीलोरुचिनराद्वलिम्बाजास्वर्वैर्हृदि निवसदेवभणपिनां ॥ अत्र पद्मस
द्मसहनावानयोवायिनिधयः क्रमाद्ध्वंजिताः ॥ एवं तथान्येलाः सिध्यादयो स्युदाहार्य्याः ॥ ८८
पूर्वपूर्वंप्रति स्याच्चेदूर्ध्वमूर्ध्वविशेषणं ॥ स्थाप्यं सत्स्वटज्यमानं वा तदात्वेकावलीं नंवेत् ॥ उत्त
रोत्तरस्य पूर्वपूर्वविशेषणत्वेन स्थापनं खंडनं वा यदि भवति तदाद्विनेदा एकावली स्यात् ॥
क्रमेणोदा॰ ॥ हंसावनं द्रिमत्नतापरीतं ल लताश्च पुष्पस्फुरिताग्रभाजः ॥ पुष्पाण्यपि स्फीतम
धुव्रतानि मधुव्रताश्च श्रुतिहारिगुंजाः ॥ अत्र पूर्वपूर्वविशेषणतयोत्तरोत्तरस्य स्थापनं ॥

नतज्जलंयन्नसुचारुपंकजंनपंकजंतद्यदलीनषट्पदम्॥नषट्पदोसौनजुगुंजयः॥क
लंनगुंजितंतन्नजहारयन्मनः॥अत्रपूर्वपूर्वविशेषणत्वेनपरंपरस्यनिरासः॥८९॥व्या व्याघातस्तुसथाकारित
तदाव्या घातः लोकेयद्यत्साधनप्रसिद्धंतच्चेत्केनचिद्विरुद्धसाधनंक्रियेततद्व्यर्थः॥यथा॥दृक याकारिक्रियंतेयदि॥त
पातनिहितंकामंदृक्पातैर्जीवयंतियाः॥गेह्यापिविनवस्नेहास्ताःस्तुवेगोपसुभ्रुवः॥य थाकारिसाधनंयथ
थावा॥सीतेमद्दुःखंनेमयासहाटवीचलेतिनन्वागदितांतमाहसा॥दवार्विंदाससवल्लाम्य तथाकारिक्रियंतस्या
हंपुरोगमश्रीविचित्रांनवतांसहाटवीम्॥९०॥गुंफःकारणमालास्याद्यथापूर्वंतिहेतुभिः॥
उत्तरोत्तरहेतुभूतपूर्वपूर्वैः॥पूर्वपूर्वहेतुभूतोत्तरोत्तरैर्वावस्तुनिर्मदिगुंफःस्यात्तदाकारण
माला॥क्रमेणोदा०॥सत्संगाद्भवेद्राग्यंवैराग्याच्चित्तशुद्धिरशुभंनवेत्॥पुंसांसचित्तविशुद्ध्याप्रसा
दमूर्त्तिः॥प्रकाशतेभगवान्भवंतिनकाःपापात्पापंदारिद्र्यंभवंदारिद्र्यात्प्रसादानेनत
स्माद्दीनतरोभवेत्॥९१॥आक्षेपश्चेद्वक्तुमिष्टस्तुनिषेधश्चवक्तुमिष्टस्यवस्तुनः॥विशेषंव
क्तुमितिशेषः॥यथा॥सखिविरहेवनमालीविलोकयतंलयाहारं॥हंतनितांतमिदानींनि
र्दयहृदिकिंव्रणंश्यामः॥अत्रहरिविरहदुःखस्यविवक्षितस्यप्रतिषेधः॥त्वांविनासोन

काव्यको॰ नविष्यतीति तस्य विशेषो विवक्षितः ॥ यथा वा ॥ नवनीतनिभा राधा वाधा स्मरशराग्नि
जा ॥ निर्दयस्त्वमिदाक्रमकिं वानत्रमदेवयम् ॥ अत्र राधा विरहवेदनायाविर्भावितायाः
५५ प्रतिषेधः ॥ अत्र कश्चित्कथलं तु तस्या विशेषो वक्तुमिष्टः ॥ वक्ष्यमाणोक्तविषयस्तयास्तेव
स्य द्विविधस्य संभवात्तथा वासोतिरूपितः ॥ ९२ ॥ ललितं वै प्रस्तुतवर्ण्ये वाक्यार्थप्रतिबिंबनं
प्रस्तुतधर्मिणि यो वर्णनीयवाक्यार्थस्तमवर्णयित्वा तत्रैव तद्वृत्तस्वरूपस्य कस्यचित् प्रस्तुतवा
क्यार्थस्य वर्णनं ललितं ॥ यथा ॥ अनायि देशः कतमस्त्वयाद्य वसंतमुक्तस्य दशां वनस्य
त्वदाप्तसंकेततया कृतार्थाश्रव्यापि नानेन जनेन संज्ञा ॥ नलं प्रसेतदाक्यं ॥ अत्र कतमो देश
स्त्वया परित्यक्त इति प्रस्तुतार्थमुपन्यस्य वसंतमुक्तस्य वनस्य दशामनायीति तत्प्रतिबिंब
भूतार्थमात्रोपन्यासाल्ललितमलंकारः ॥ ९३ ॥ रसादीनां रसांगत्वे रसवत्परिकीर्त्यते ॥
॥ यथा ॥ कांतश्रवोंतइत्यादि ॥ अत्र हास्यांगं शृंगारः ॥ यथा वा ॥ मुनिर्जयति योगींद्रो महात्मा कुं
भसंभवः ॥ येनैकचुलिके दृष्टौ दिव्यौ तौ मत्स्यकच्छपौ ॥ अत्र मुनिविषयकभावांगमद्भुतः ॥
९४ ॥ भावस्य चेदंगता यानि रसाद्यैः प्रेय उच्यते ॥ यथा ॥ चेतो मदीयं चिकुरे निपत्य मिलत्यादि ॥

॥अत्र स्मृतिरूपो भावो विप्रलंभांगं॥९५॥ तदूर्जस्वि रसाहो चेदंगं ना भासयोर्नवेल॥ यथा॥ लु
ब्धैर्निकहतान्दारान्पुनः प्राप्य त्वदाज्ञया॥ मुदितैर्मथुरानाथ वंद्यं सशास्त्रवैरिपि॥ अत्र श
त्रुस्तुतिरूपो भावो भासो नगरवद्विषयस्य भावस्यांगं॥९६॥ अंगे रसादेर्भावस्य प्रशमश्चेत्स
माहितं॥ यथा॥ देवेंद्रजित्सु पृथुकात्पृथुकोपमाद्भीरस्मात्सुसन्नुत वेत्ति गिरा सुराणां॥
कंसस्य यो हृदि मदः स तु तेषु सर्वेष्वास्ते स्तुत पृथुकतां क्रमतो न जाने॥ अत्र मदप्रशमस्तस्या
गं॥९७॥ भावोदयादेरंगत्वे कथितास्तत्तदाह्वयाः॥ भावोदय भावसंधि भावशबलत्वाख्यास्त्र
यो लंकाराः॥ यथा॥ मधुपानप्रवृत्तास्ते सुहृद्भिः सह वैरिणः॥ श्रुत्वा कुतोऽपि त्वन्नाम लेभिरे विश
मदृशां॥ अत्र राजविषयकभावांगत्रासोदयः एवमन्यत्॥९८॥९९॥१००॥ अथ प्रमाणालंका
राः॥ प्रमाणजन्या प्रमितिः प्रमाणालंकृतिः॥ स्मृताः॥ तत्र प्रत्यक्षं॥ यथा॥ कल्पवाल्यान्मृ
दुस्पर्शात्सौरभ्यादधरासवात्॥ सोरमाब्जाभिमतान्विहरंसी द्रियपंचकं॥ अत्रेंद्रियतद्वा
जन्यं प्रत्यक्षमलंकारः॥ यथा वा॥ आसन्नपद्माकरे स्त्रीणां मिलसादि॥ अत्र त्वमानेतरं चाक्षु
षं तत्॥१०१॥ अथानुमानं॥ यथा॥ जानीमहे स्याः हृदि सारसाक्ष्या विराजतेऽन्तः प्रियवक्त्रचंद्रं

काव्यको.
९५

45

दः तत्कांतिजलैर्लैः प्रसृतैर्मत्तंद्गोघ्यापांडुताकुंद्मलता स्मिपमे ।। अस्या हृदयं प्रियवदनचं
द्रवदिति रूपकविच्छित्त्यास जातानुमितिरलंकारः ।। वह्निमान् धूमादित्यादौ तु नायं विच्छित्ति
विरहात् ।।१०२।। अथोपमानं ।। यथा ।। तां रोहिणीं विजानीहि ज्योतिषामत्र मंडले ।। यस्त
न्वि तारकान्यासः शकटाकारमाश्रितः ।। अत्रोपमानमूलमतिदेशवाक्यं ।। शकटाका
रा रोहिणीमुपमितिः ।।१०३।। अथ शब्दः ।। वेदास्तथा स्मृतिगिरा यमचिंत्यशक्तिं सृष्टि
स्थितिप्रलयकारणमामनंति ।। तस्यामसुंदरमचिंत्यमात्ममूर्तिं सर्वेश्वरं प्रणति मात्रव
शं नजामः ।। अत्र निर्विकारचैतन्यमूर्तिरीश्वरो जगद्धेतुरित्यत्र श्रुत्यादिप्रमाणमुक्तं तज्ज
न्या शाब्दी प्रमितिः ।। एवमाचारविषयाः स्मृतयः श्रुतिलिंगादयश्च षट्बोध्याः ।।१०४।। अथा
र्थापत्तिः ।। निर्णेतुं शक्यमस्तीति मध्यं तव नितंबिनि ।। अन्यथानोपपद्येत पयोधरभरस्थितिः
अत्र कुचस्थित्यन्यथानुपपत्त्या जनितार्थापत्तिर्मध्यसत्त्वप्रमाणमिति ।। तल्लिश्चयरूपा प्र
मितिः ।।१०५।। अथानुपलब्धिः ।। यथा ।। स्फुटमसद्वलग्नं तन्वि निश्चिन्वते तेन हनुपल
नमानास्के स्तर्कयंतो पि लोकाः ।। कुचगिरिवरयुग्मं यद्विना धारमास्ते तदिह मकरकेतो

रिंद्रजालेप्रतीमः॥ अत्र मध्यानुपलब्धिर्मध्याभावे प्रमाणं॥ ततो मध्यं नास्तीति प्रमितिः॥१०६॥
अथ संभवः स च सहस्रे शतं संभवतीति बुद्धेः संभावना यथा॥ ये नाम केचिदिह नः प्रथयंत्यव
ज्ञां जानंति ते किमपि तान्प्रति नैष यत्नः॥ उत्पत्स्यतेस्ति मम कोपि समानधर्मा कालो ह्ययं नि
रवधिर्विपुला च पृथ्वी॥ अत्र समानधर्मविशिष्टस्य जनस्योत्पत्तिस्थितौ संभवती संभवाख्येन
प्रमाणेन सिध्यन् तद्दुषयादिके च कालानंत्य पृथ्वीवैपुल्येन भवतः॥१०७॥ अथैतिह्यं॥ तच्चाज्ञा
तवक्तृकं यैकं पारंपर्य प्रसिद्धमेव॥ यथेह तरौ यक्षो निवसतीति॥ ॥ कल्पाली चतुर्णा अयं लो
किकी प्रतिभातिमे॥ लतिजीवंतमानंदो नरं वर्षशतादपि॥ इह लौकिकी गाथैव निर्दिष्टवक्तृ
कं प्रवादपारंपर्यमुक्तं॥१०८॥ अथ पूर्वोक्तैरनुप्रासाद्यैरितिलांतैरलंकारैः॥ संसृष्टिसंक
रो नाम स्यातां॥ यथा मणिस्वर्णादि संयोगे चारुत्वातिशयी पृथगलंकारस्तथानुप्रासोप
मादि संयोग संसृष्टिः संकरस्तु तादृक् पृथगलंकारो नृसिंहाकारवपुः संसृष्टेति तिलतंडुलन्याये
न संकरस्तु क्षीरनीरन्यायेनालंकारयोगाः॥ तथाहि॥ सा स्यात्संसृष्टिरेतेषां पृथग्भेदकतया।
स्थितिः॥ एवं तिलानामलंकाराणामेकस्मिन्काव्ये मिथो निरपेक्षतया स्थितिः॥ संसृष्टिः यथा॥

काव्यको
५६
96

क्षः पायादपायान्नः पूर्णेन्दुः सदृशाननः ॥ जगज्जालहलसरसीहंसः केशवंशनिसूदनः ॥ अ
त्र पायादपायादिति यमकं केसवंशेत्यनुप्रासः अनयोः संसृष्टिः पूर्णेति जगदिति चोपमारू
पकयोः एवं संसृष्ट्योरस्य संसृष्टिः ॥ यथा वा ॥ वृंदावने द्रुमतले युगवान् [illegible] वेदावसानसम
येषु च मृगपतेन तेन ॥ त वेणुवादनपरं शिखिपिछचूडं ब्रह्म स्मरामि कमलेक्षणमभ्रनीलं ॥
अत्र पूर्वार्द्धे तुल्ययोगितानुप्रासयोरुपमानयोः संसृष्टिः ॥१०८॥ स्थितिरंगांगिभावेन तद्वदे
काश्रयेण च तत्संदिग्धत्वेन चेत्येषां तेषां स्यात्संकरस्त्रिधा ॥ तत्रांगांगिभावेन स्थितिर्यथा
वदनमृगांके सुदृशो वसितसिन्नस्तत्रमालिकोवीक्ष्य ॥ उदितेपि भूमिकाकी विशंकयासोऽप्रवे
पते रात्रेः ॥ अत्र रूपकमंगी गम्योतिमानं गी ॥ यथा वा ॥ अनुरागवती संध्येत्यादि ॥ अत्र स
मासोक्तिर्विशेषोक्तेरंगं ॥ एकाश्रयणेन स्थितिर्यथा ॥ राजते रघुवंशस्य कीर्तिः कुंदेंदुसुंद
री ॥ अत्र व्यतिरेकानुप्रासयोरेकपदाश्रयणेन स्थितिः ॥ यथा वा ॥ नदः किमकराद्भुत
न्न ते य एवं मयोदयं ॥ यशोदाच महानागा यथा यस्यास्तनं तरि ॥ यस्य नंदस्यास्तनं शाद्दे
वाक्यं यथो घातिनवानिति प्रथमोर्थः ॥ अत्र अनुमानश्लेषयोरेकपादाश्रयणेन स्थि

५६

ति॥ संदिग्धत्वेन स्थितिर्यथा मुखाब्जे नवपश्यामो हृशान घुतिसु करे॥ अत्र हस्त कमुपमि मा वेत्य
निश्चया-संदेहः॥ एकतरस्य कानुपत्वं नाव॥ यथा वा॥ हो न्यो संयामित इत्यादि॥ अत्र विशेषा
क्तिविभावनयोः संदेह न संकरः॥ अनुकूलार्थान्तरन्यासयोस्तयोश्चैकाश्रयणे न स्थितिस्त्वाच
सः एकतरस्य के हृपत्वे नेतु न संदेह संकरः॥ यथा॥ तेव दंष्ट्री करपाहि मुकुंजे रकरर्ष एक
जं॥ यथा वा॥ तां बिद्धा स्करसंज्ञा समालिंगितिसर्वहा॥ अत्रालिंगितमुपमायां चाधकं॥ सत्यो
पतितुल्यत्वं स्यासंनमात्॥ १०१॥ अथैषामलंकाराणां केचन यामदोषाः॥ संतितेत्के मुहोषे
घत्वं नवित्यदः॥ शब्द नलोस्यते॥ तथा हि॥ वैकल्यं मप सिद्धीरीत्ययोग्यता चानुप्रासस्य दोष॥
म चापुष्टार्थत्वंश्रमि द्धिविरोधः प्रतिकूलासरत्वं चक्रमात्॥ क्रमेणोदा॥ सुंदरोनंदपुत्रासोकं
सत्वं दशनाशनः॥ अत्रानुप्रासो वाक्यो घोषकत्वादिफलः॥ हस्तरकाणां संतद॥ कुंदद्युति
प्रतिमा वनो॥ अत्र सर्वेषां द्वानां शोभ्यमप्रसिद्धं॥ शिखंडितां नवे नामाकोडमकांडे विखं
डिता॥ अत्र शृंगारे गोडीरीतिरप्रयुक्ता॥ यमकस्य त्रिपादां स्थितिरप्रयुक्ता॥ यथा॥ सार
संनत्रपश्यंती सारसं नवयौवना॥ प्रयसि श्रीहरो सुक्तः सारसं प्रत्यपद्यत॥ उपमायामसा द

काव्यको. श्यासंनवानुचितार्थता ॥ क्रमेणोदा० ॥ हंसीकरी वनिर्जातिविधुवत्पांडुरं वचः ॥ अत्र मरा १२००
लगजयोः साद्दश्यं नास्ति वर्चासि सौल्यमसंभवि ॥ उपमानस्य जातिप्रमाणगतेन्यूनत्वाधिः
४७ क्ये च तथा ॥ क्रमेणोदा० ॥ विप्रोयं सर्ववद्दीर्घोदधिविंदुनिभो विधुः ॥ अत्र जात्या प्रमाणेन न्य
न्यूनता दीर्घायुर्द्रौणिवत् काको वेणीयं यमुनोपमा ॥ अत्र जात्या प्रमाण्येन चाधिक्यं ॥ नव प्र
नः संप्रति काव्यकौस्तुभः प्रज्ञा निविघो कविभूषणेन यः ॥ आलोकतत्त्वस्य जनैः सुबुद्धिभिः
परीक्षतामेष नु काव्यरूपः ॥१४॥ विद्याभूषणगद्दितं गृहीतं तं काव्यकौस्तुभं विमलं ॥ लि
खितं यदि कमनीयो न मनीयो सो न किं सहेसि ॥ २ ॥ ॥ इति काव्यकौस्तुभे शब्दार्थालं
कारनिर्णयो नाम नवमी प्रभा ॥ ९ ॥ ॥ संवत् १८२१ मा ३ ॥ ६ ॥ गुरु रूपति पत्नि यो सोम ॥
शुभं भूयात् ॥ लिखितं नंदकिशोर ब्राह्मण ब्रह्मपुर मध्ये ॥ ॥ ॥

११ ॥